५·

विघ्नेश्वरं नमस्कृत्य विधाय गुरुवंदनम् क्रियते ... परिभाषेन्दुचन्द्रिका १

१

श्रीगणेशाय नमः श्रीगुरुभ्यो नमः ॥ साम्बमिति अम्बा जगदुत्पादयित्री तत्सहितमित्यर्थः एतेन जग
त्स्रष्टृत्वं संसूचितम् शिवमिति शेते जगदस्मिन्निति व्युत्पत्तिः एतेन लयाधिष्ठातृत्वं सूचितम् ब्रह्मेति बृंहतीति ब्रह्म
अंतर्भावितण्यर्थो बृंहिः वर्धयतीत्यर्थः बृहि वृद्धाविति वचनात् एतेन पालकत्वं सूचितम् अनेन सृष्टिस्थितिलया
धिष्ठातृत्वम् परमात्मन एवेति यतो वा इमानीत्यादिश्रुतिप्रतिपादितपरब्रह्मनमस्कारः फलितः नागेश इति ननु स्वा
त्मनामेति श्रुतिविरोधात् स्वनामग्रहणमयुक्तमिति वाच्यम् नगृह्णीयादित्यस्य नोच्चारयेदित्यर्थेन लेखने तदुच्चारणा
भावेन दोषाभावात् अत एव व्यवहारकांडः सर्वोऽपि संगच्छते यत्तु कूपखनन न्यायेन स्वनामोच्चारणजनितपापना
शो भवतीति तन्न नांतरीयकपापनाशस्यैव [illegible] न्यायविषयत्वेन स्वनामोच्चारणस्य ग्रंथकरणे नांतरीयकत्वाभावात्
यद्यपि न तत्साम्बमिति मंगलाचरणेन स्वनामोच्चारणजनितपापनाश इति तदपि न पुण्यपापयोः शब्दैकसम
धिगम्यत्वेन मंगलाचरणस्य विघ्नध्वंसमात्रस्यान्यतरेतरफलकत्वे प्रमाणाभावात् कुरुत इति न स्वपुरुषबोध्यरू
पफलस्य परगामित्वेनात्मनेपदमनुचितमिति वाच्यम् स्वर्गादिरूपमुख्यफलस्यात्मगामित्वेनादोषात्
अत एव ऋत्विजो यजंतीत्यादौ दक्षिणारूपफलस्यात्मगामित्वेऽपि नात्मनेपदम् फलमुख्यत्वं च यदु
द्देशेन प्रवृत्तिस्तत्त्वम् अथवा ग्रंथनावक्षेपणेत्यादिना प्रकथनेऽतङ् परिभाषेन्दुशेखरमिति परिभाषा इव
इन्दुः शेखरः शिरोभूषणं यस्येति महादेवपक्षे परिभाषा एव इन्दुः तस्य शेखरः प्राधान्येन कथनमि
ति ग्रंथपक्षे अत्रोनार्थेन विषयप्रयोजनसंबंधाधिकारिणोऽनुबंधाः सूचिताः

మయూరకవంశరాదితాప్రవృమానే పత్త్రి వని పాహూనాది ప శలిపలూపె షుప్రౌంద రాందితా పదాప్తతల్లాపెసాధు గానధ దశకశన్నవిదష రంజ లెస్సంధ్వక
కణాసమ పొపతి హస్త్రాత్రి పప్రుతే। జాతావ్రష్ఠయాం। శ్రీ సమృద్ధ పరి బారపారనూపతిస్థితె కసమారాంగులెన్సుంగ త్రితాప్రదాం సమూస శ్రీ పరణాన పదవిధిరితిసూ
శ్రీ స్వరణాసనవపదతెవాన సుబంతతెవనవాయ శ్రీ సాక్షాదు ద్వైతాప శ్రీ పుతపరి భారాతాం శ్రీ వల తీర్థ్వారాంతి। జతాపస్థారిమాశ్రీ స్వపదతా భావాతి॥
బాలశశాస్త్రి వదాం భూజ శ్యావసంవత్సరే చైత్ర సాం। రాంఘ్రాం రామయంలు తం శ్రీ స్వకలపాం వాంత్రె
[illegible]
సత్రే ప్రతాప్తవిజయనగరం దివసత్తీమాంత (పూసాపాటివంశ సంభూతా రాజాసం దా
ల్కి జగత్ప్రతి నామ్ని ॥ శ్రీ వర జీజల్లీ ఖులజవీరరాం ఘువ సూనునా సుబ్రహ్మణ్య
స్వనాం వారం యత్నశీలాం నైనివాంసినః॥ శ్రీ॥ రచితం విశ్వనాథేన పరిశోషం బు వత్రి
తాం శ్రీ త్రైభూం తుంగ స్వగవతాంశి పాఠవిశ్వనాం ధయాం ॥ ॥

[illegible]

[illegible]

१०
२

प्रवृत्तिमात्रं प्रति इष्टसाधनत्वप्रकारकज्ञानस्य कृतिसाध्यत्वप्रकारकज्ञानस्य च कारणत्वेन तज्जनकज्ञानविषयानुबंध
निरूपणस्यावश्यकत्वात् तथाहि अधिकारिज्ञानेन कृतिसाध्यत्वप्रकारकं ज्ञानं जायते प्रयोजनज्ञानेन च इष्टसाधनत्व
प्रकारकं ज्ञानं जायते विषयसंबंधज्ञानाभ्यां च उभयज्ञानं जायते विशिष्टबुद्धौ विशेष्यतावच्छेदकज्ञान
धर्मप्रकारकनिश्चयस्य कारणत्वात् असंबद्धज्ञाने प्रवृत्त्यसंभवाच्च संबंधश्च विषयप्रयोजनाधिकारिणां प
रस्परं प्रतिपाद्यप्रतिपादकभावश्च प्रकृते च प्रयोजनाधिकारिणोः समवायः संबंधः सुखबोधस्य गुणत्वेन
गुणगुणिनोः समवायात् विषयाधिकारिणोश्च स्वसमवेतज्ञानविषयत्वं प्रयोजनविषययोश्च विषयविष
यिभाव इत्यादि स्वयमूह्यम् । तथा च ग्रंथाध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानविषयत्वमनुबंधस्य
सामान्यलक्षणं तत्र विषयरूपमनुबंधमुपपादयति प्राचीनेति वाचनिकानीति वचनान्येव वाचनिकानि
विनयादित्वात् ठक् उपनिबद्धानीति संमतानीत्यर्थः तेन कार्यमनुभवन् लुग्विकरणालुग्विकरणयोरिति परिभाषयोर्भाष्यादर्शनेऽपि
तद्व्याख्यानं नानुचितम् ज्ञापकन्यायसिद्धानीति न च शुद्धवाचनिकपरिभाषाव्याख्यानमनुचितम् अप्रतिज्ञातत्वादिति वाच्यम्
प्रायेणेति शेषेणादोषात् अथवा आद्यंतज्ञापकन्यायशब्दाभ्यां स्वतःसिद्धपरसिद्धशब्देन द्वंद्व इति न दोषः वस्तु
तस्तु शुद्धवाचनिकी परिभाषा नैवास्ति वाचनिक्येषैसस्यभाष्ये वचनरूपेण पठितेत्यर्थ इति न दोषः तद्व्याख्यावसरे
तज्ज्ञापकं तत्न्यायश्च वक्ष्यते इति दिक् संदेहादिति तात्पर्यस्येति शेषः ननु शक्यतावच्छेदकभेदाच्छक्यतावच्छेदकभेदाद्वा
शक्तिर्भिद्यते शक्यतावच्छेदकभेदे नानार्थत्वव्यवहारः शक्यतावच्छेदकभेदे पर्यायव्यवहारः तथा च एकशक्तिनि

रूपकार्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति अपरशक्तिनिरूपकार्थविषयकबोध्यतात्पर्यज्ञानं प्रतिबंधकमिति प्रतिबध्य
प्रतिबंधकभावमूलकसकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति न्यायस्य नानार्थस्थले एव प्रवृत्तिरिति प्रकृतानादि
पदस्थले च शक्यतावच्छेदकस्याणपदत्वादेः शक्यतावच्छेदकस्य अंकारादिणांतसमुदायघटकत्वस्य तादृशघट
कबोध्यत्वस्य वा ऐक्येन शक्तिभेदाभावेन सकृदुच्चरितन्यायविषयाभावेन न तात्पर्यसंदेह इति चेन्नैवम् अइउ
ण्सूत्रेण कारोच्चारणसामर्थ्येन अणादिपदानामकारादितत्संज्ञकवर्णप्रागवृत्ति वर्णतद्भिन्नसमुदायस्य तद्घटकेषु तद्घटकबोध्ये
षु वा आदिरन्त्येनेति शास्त्रेण शक्तिर्बोध्यते इत्यसद्दोषात् तथा चाणपदस्य अकारादि उकारांतसमुदायघटकत्वम
दिलानाघटकत्वं च शक्यतावच्छेदकमिति नानार्थत्वं सुस्थमेव अथवा अणादिपदस्य अइउ एतद
न्यतमत्वं शक्यतावच्छेदकं अइउ ऋ ऌ ए ओ ऐ औ हयवरट् एतदन्यतमत्वं च शक्यताव
च्छेदकमिति नानार्थत्वं स्पष्टमेव अथ अन्यतमत्वं तद्भिन्न भिन्नत्वमिति शक्यतावच्छेदककुक्षौ स
र्वेषामेव शक्तिगौरवम् किंच तद्भिन्नभिन्नत्वे विशेषणविशेष्यभावे विनिगमनाविरहान्नानाशक्यतावच्छेद
ककल्पनाप्रसङ्गः तथाहि अइउ एतदन्यतमत्वं अकारभिन्नत्वे सति इ भिन्नः तद्भिन्नत्वे सति य उ भिन्नः
तद्भिन्नत्वं वा इ भिन्नत्वे सति य उ भिन्नः तद्भिन्नत्वे सति यः अ भिन्नः तद्भिन्नत्वं वेत्यादिकं शक्यतावच्छेद
कं कल्पनीयमिति चेन्नैवम् अभेद इ भेद उ भेद एतद्भेदत्रयासमानाधिकरणभाववत्त्वमेतदन्यतमत्वमितिक

5

स्थाने नादोषात् व्याख्यानतइति शिष्टकृतादिति शेषः विशेषप्रतिपत्तिरिति विशेषस्य तात्पर्यविशेषस्य प्रतिपत्तिर्निश्चयः
कर्तव्यइति शेषः त्रिस्वर्थे संदेहानुत्पन्नलक्षणमलक्षणं न भवति लक्षणत्वं च साक्षात्परंपरया वा अनाहार्यप्रामाण्यज्ञानाना
नास्कन्दित लक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानोपयो
गीयोबोधः तज्जनकत्वम् प्रंसारव्यानादिना लक्षणस्यालक्षणत्वेपि संदेहमात्रेणालक्षणत्वमनुचित मितिभावः
यथाश्रुतं तु न सम्यक् लक्षणत्वेन अनुष्ठापकत्वेन च व्यासे नैव हुंश्रीहाविसादौ व्यभिचरितत्वात् अन्यतराधर्थस्येति
अन्यतराधर्थविषयकतात्पर्यस्येत्यर्थः वस्तुनि विकल्पायोगेन अर्थे संदेहाभावात् संदिग्धोच्चारणेति अत्र संदिग्ध
पदमर्थाधजनाम् तथा च संदेहजनकमुच्चारणमित्यर्थः नत्वद्वयोरकेरवस्तु इतरशास्त्रेष्विव अत्रापि व्या
ख्यानेन संदेहनिवृत्तिर्भवतीति किमनया परिभाषयेति शंकापनोदार्थः तथा चात्र शास्त्रे उत्तरमुनिवचना
नुसारेणैव पूर्वमुनेस्तात्पर्यमवधारणीयमिति परिभाषावश्यकी तदेतत्प्रख्यातेयथोत्तरमुनीनांप्रा
माण्यमिति ॥ तत्रेति व्याकरणे शास्त्रे इत्यर्थः अवच्छेदकत्वं सप्तम्यर्थः तथा च व्याकरण
शास्त्रत्वावच्छेदेन पदद्वयम् किंविषयरसाह संज्ञापरिभाषयोरिति तेन प्रतिसंज्ञं प्रतिपरिभाषं पक्ष
द्वयाभावेपि न क्षतिः देशाच्चोरच्चारणकालेएवेति वैयाकरणानां साङ्ग्ययोगानुयायित्वेन तन्नये

कालदेशोदरकारणानां तत्रानभ्युपगमात् तथा च कापिलं सूत्रं दिक्कालावाकाशादिभ्य इति भविष्यति किं
चिदेतेन प्रयोजनमिति स्मृतिं प्रति अनुभवस्य हेतुत्वाद्भावस्यापि तेन स्मृ स व्यवहितपूर्वक्षणावच्छेदेन
अनुभवस्याभावात्कारणासंभवतीति मध्ये अनुभवसमानाकारसंस्कारव्यापारो हि कर्तव्यः
एवमपि आजन्मसर्वदा संस्कारस्य सत्त्वात् सर्वदैव स्मरणप्रसङ्ग इति उद्बुद्धसंस्कारस्यैव स्मारकत्वं वक्तव्यं
उद्बोधकं चैकसंबंधिज्ञानादिकं नन्वेवमपि सर्वानुभवजनितसंस्काराणां उद्बोधकसत्त्वेपि स्मरणं न भव
तीत्यनुपपत्तिस्तदवस्थैवेति चेन्न दृढतरस्य संस्कारस्यैव उद्बोधकसत्त्वे स्मारकत्वमिति कल्पनेनादो
षात् दृढतरसंस्कारोत्पत्तौ कारणमपेक्षाबुद्धिः दृढतरसंस्कारानुत्पत्तौ च कारणमुपेक्षाबुद्धिः तथा
च उपेक्षाबुद्ध्या दृढतरसंस्कारानुत्पत्तौ स संस्कारः कियताचित्कालेन लुप्यत इति उद्बोधकसत्त्वेपि न स्मृतिः
उपेक्षाबुद्धौ कारणं नैष्फल्यज्ञानमपेक्षाबुद्धौ साफल्यज्ञानमिति तथा च वृद्धिरादैजिति वाक्यबोधा
नंतरं इदं ज्ञानं कस्यापि साफल्यं विधत्त इति नैष्फल्यबुद्धेरुपेक्षाबुद्ध्या आदैचोर्वृद्धिपदसांकेतिकानुभवजनि
तः संस्कारो नोत्पन्न इति तस्य लुप्तत्वेन उद्बोधकवृद्धिपदश्रवणेपि आदैचामुपस्थितिर्न भवतीति वृ
द्धिरेचीत्यत्र पुनः वृद्धिरादैजिति सूत्रस्य वाक्यार्थबोधे न भाव्यम् अयमेव कार्यकालपक्षो नाम तथा चो
पेक्षाबुद्धिः कार्यकालपक्षस्य बीजम् यस्य उपाणिनिराह इति ज्ञानं तस्य इदानीं प्रयोजना

भावेऽपि भविष्यति किंचिदनेन प्रयोजनमिति साफल्यज्ञानेन अपेक्षाबुद्ध्या इष्टतासंस्कार उत्पद्यत इति बाह्यपदं
श्रवणे नादेयाद्युपस्थितिर्भवतीति वृद्धिरादैजिति ~~[illegible]~~ तिवाक्यार्थबोधस्य पुनर्नोपयोगः अयमेव यथोद्देश
पक्षो नाम तथाचापेक्षाबुद्धिर्यथोद्देशपक्षबीजमिति वाक्यार्थबोध इति ओपक्षेऽपि अधिकरणबोधकसम्भवना

[illegible]
[illegible]
[illegible]

पदपरिभाषाशास्त्रे निर्दिष्टपूर्वस्य सुपतिष्ठत इति वाक्यार्थबोधे जात इत्यर्थः सकलतत्तादृश्युपस्थिताविति अत्र
सकलेत्यस्यार्थं सकलविध्युपस्थितेर्भमाणाभावात् कार्यकालपक्षविषयत्वासम्भवात् सकलतत्तादिति अत्रा
पि सकलेति पूर्वपक्षार्थम् गुणमेवमिति परिभाषाविधेयमेवमित्यर्थः तथाच साफल्यज्ञानस्यैव सत्त्वेन अपेक्षा
बुद्धेरसंभवात् परिभाषाविषये कार्यकालपक्षस्य अपेक्षाबुद्धिबीजमिति वक्तुमशक्यत्वादिति भावः किंतु यानि
विधिशास्त्राणि परिभाषा ~~[illegible]~~ देशेनोपस्थितानि तद्विषये कार्यकालपक्षः तदेतदाह त्रिपाद्यामुपस्थित
विति विशेष इति सर्वविधिसूत्रवृत्त्याविति अनासर्वेतित्यर्थं परिभाषाबुध्येति परिभाषाविधेयोपस्थित इत्यर्थः
पर्युदासन्यायेनेति नञो भेदार्थकत्वेन क्ङिति च इति सार्वधातुकार्धधातुके इत्यादिबोधविति भावः ननु प्रथ
मांतद्वयसमभिव्याहृतस्य समासघटकस्य नञ एवं भेदार्थकत्वं अन्यत्रान्वितताभावार्थकत्वमिति कथमत्र पर्यु
दासविषय इति चेदाह प्रसज्येति तेन सहेति नच इक्कोऽयणचि इत्यादावपि इत्यसन्योऽर्थोऽपि सह बोध्यं

देकवाक्यतापत्तिरिति वाच्यम् उपजीव्योपजीवकभावापन्नबोधेनेत्यर्थकरणेनादोषात् तथाहि वाक्यैक

ते वाक्यता पदैकवाक्यता पदार्थैकवाक्यार्थैकवाक्येति त्रिविधा एकवाक्यता तत्रोपजीव्योपजीवकभावापन्न

बोधप्रयोजकत्वं वाक्यैकवाक्यत्वम् यथा संज्ञाविधिशास्त्रयोः परस्परनिरूप्यनिरूपकभावापन्नविषयता

प्रयोजकपदघटितत्वं पदैकवाक्यत्वम् यथा पदोपस्थापकपरिभाषाविधिशास्त्रयोः परस्परनिरूप्यनिरूपकभावा

पन्नविषयताश्रयत्वम् पदार्थैकवाक्यार्थत्वम् यथा अर्थोपस्थापकपरिभाषाविधिशास्त्रयोः प्रकृते निषेध

विधिशास्त्रयोरुपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वेन वाक्यैकवाक्यतेति दिक् न च पदमन्यवाक्यार्थबोध

इति साक्षात्परंपरया वा अनाहार्यप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानोपयोगी बो

धस्य जनने इत्यर्थः एतेन पदजन्यपदार्थोपस्थितौ वाक्यार्थबोधे बाधकाभावादिदमसङ्गतमित्यपास्तम्

पूर्वग्रहणे भागग्रहणादिति न च अणोऽप्रगृह्यस्येत्येकवाक्यतापन्नाददसो मादित्यस्यासिद्धत्वेन तदेकवाक्यता

पन्नपूर्वत्रासिद्धमित्येतस्याप्यसिद्धत्वं भवति असिद्धस्यासिद्धत्वे सिद्धत्वमेव स्यादितीदमसंगतमेवेति वाच्यम्

पूर्वत्रासिद्धमित्यस्य वैयर्थ्यापत्त्या पूर्वत्रासिद्धमित्यस्यासिद्धत्वं न भवतीत्यभ्युपगमेनादोषात् तु तत्र सपरत्वे

पूर्वत्रासिद्धमित्यस्यैव ... अनाहार्यप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानोप

नैवेति अयं भावः यस्मिन्देशे अनाहार्यप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानोप

योगी बोधो जायते स स्वीयोद्देशः संज्ञाशास्त्रस्यैतादृशो बोधो विधिदेश एवेति विधिदेशीयत्वमिति अन

प॰
५

प्रमाणमाह भाष्ये ~~...~~ उक्तास्मृतिः यथोद्देशपक्षइति ननु ... आदौ कार्यकालपक्षे कथं पदत्वमिति सूत्रग्रन्थविरोधः न च मसाहचर्यात्पदसंज्ञा प्रत्ययनिमित्तक एव गृह्यत इति न दोष इति वाच्यम् राजन्वद्दस नलोपप्रसक्तिरिति चेन्मैवम् एवकारेण विधिदेशीयस्य रूप कार्यकालपक्षाश्रयणवच्छेदेनादोषात् अन्यच्च प्रमाणमथा

[illegible]

दानमनुत्तराणीति भाष्यम् अन्यथा परत्वाद् पानसंज्ञैव स्यादिति भाष्यासङ्गतिः स्यात् एव अत एव राजा दण्डिना जरसे सर्वे नलोपप्रसक्त्यादिकं न तत्र जातशक्तिग्राहकत्वेनेति अयं भावः पूर्वत्रासिद्धमित्यनेनासिद्धत्वं शास्त्रीयत्वेनापेक्षा बोध्यते अन्यथा त्रिपाद्यां सापादिकशास्त्रमात्राप्रवृत्तिप्रसङ्गात् शास्त्रीयत्वेनैव लक्षणमेव तथा च संज्ञाशास्त्रप्रवृत्तिमन्तरा शाब्दबोधस्यैवाभावेन लक्षणसंपादकपरिभाषाप्रवृत्तिमन्तरा अनाहूत्या प्रमाण बोधाजनकत्वेन च त्रिपाद्यां शास्त्रत्वमेव नास्तीति संज्ञाशास्त्राणां शास्त्रत्वावच्छेदेनोद्देश्यकेतरपरिभाषाणां च त्रिपाद्यां प्रवृत्तिर्भवत्येव शास्त्रत्वावच्छेदेनोद्देश्यताकस्य प्रविप्रतिषेध परं कार्यं अनुदात्तपदमेकवर्जं असिद्धवदत्राभात् सन्निपातलक्षणो विधिरनिमित्तं तद्विघातकस्य इत्येतत्परिभाषाचतुष्टयस्य च त्रिपाद्यामप्रवृत्तिः परशास्त्रत्वस्य उदात्तस्वरितान्यतर ~~शास्त्र~~ विधायकस्य शास्त्रत्वस्य अनाङ्ग शास्त्रत्वस्य विघातकशास्त्रस्य चक्रमेणाप्रवृत्तो लिङ्गत्वादिति दिक्

लक्षणानां तत्र

स्ववाक्तिलिङ्गचिह्नितेति स्वं विधिशास्त्रं तद्भूतियल्लिङ्गं परिभाषाशास्त्रीयोद्देश्यतावच्छेदकं तच्चिह्नितपरिभा
षाणामाक्षेप इतियावत् यथा स्वं रूपं शब्दस्येत्यादि तद्धि लिङ्गात्मोपस्थितेः कार्यकरण ~~[struck]~~ बोधक
सम्बन्ध्यघटितत्वम् तच्चिह्निता यान्त्रिमानीति परिभाषाया आक्षेप इति ताल्लिहत्सिद्धमिति स्वम
परत्वं पुरुषं पिशाचो यथा कर्षतीति तद्वद्विधिशास्त्रमपि परिभाषामाकर्षतीति भावः तावताप्य
सिद्धिरिति पिशाचस्य नीचत्वात् स्वमपरत्वत आकर्षणेपि राजस्थानीयं प्रधानं विधिशास्त्रं अप्रधानभृत्य
स्थानीयं परिभाषाशास्त्रं नाकर्षतीति प्रकाशाशयः परत्वादि [illegible] सस्यासङ्गतेरिति नन्वतमेकदेशस्थ इत्यादिग्र
न्थेन सूक्ताप्रबन्धेन परिभाषाशास्त्राणां विधिदेशीयत्वस्य निराकरणादिमे शङ्कासमाधाने विनेव [illegible] इति नाच्यम्
स्थूणानिखननन्यायेन उक्तार्थस्य दृढीकरणाय पुनः शङ्कासमाधानयोः करणेनादोषात् यद्वा परिभाषाणामेव पक्ष
द्वयेपि स्वदेशीयत्वम् संज्ञाशास्त्राणां यथोद्देशे स्वदेशीयत्वं कार्यकाले विधिदेशीयत्वमिति प्रतिपादितम् अने
न ग्रन्थेन तु सर्वत्रैव पाठकृतं परत्वं पूर्वत्वमादाय व्यवस्था कर्तव्येति बोधनाय पुनः शंकासमाधानयोः करणात्
वं न चैकवाक्यादिभ्यः परेव [illegible] सत्त्वेतेति भाष्यविरोध इति वाच्यम् परे सस्य उक्ताज्ञा अपवादमूलेति यावदिति सर्थ्ये
करणेनाविरोधात् यद्वा केचिदित्यादिना परिभाषाविषये उपेक्षाबुद्धिर्न सम्भवतीत्युक्तम् अनेन तु तद्वि
षयेपि उपेक्षाबुद्धिः संभवतीति बोध्यते तथाहि तस्मिन्निति वाक्यार्थबोधे जाते सप्तमीनिर्देशादि

प. ६

ष्ठे लिङ्गजिज्ञासासामर्थ्ये सैव अनेन शास्त्रेण कस्यापि साधुत्वं न विधीयत इत्युपेक्षाबुद्धिः कृता तस्य इको यणचीत्यादि
स्यादौ तस्मिन्नित्यादेः पुनर्व्याख्यार्थबोधेन भाव्यम् तथा च विधिदेशे एव लक्षणमिकः साधुत्वप्रकारकत्वानोपयोगी
बोधो जात इति शंकायाः संगतिः ननु तस्मिन्नित्यादि व्याख्यार्थबोधे सप्तमीनिर्देशादिकी त्यादिपूर्वग्रन्थविरोध इ

[illegible]

ति वाच्यम् तस्मिन्नित्यादि सप्तमीनिर्देशादी लुप्तसप्तम्यापि अतद्गुणसंविज्ञानबहुव्रीहिस्वीकारेण विरोधा
भावात् कोपेक्षाबुद्धिः का पेक्षाबुद्धिरिस्म लक्ष्यानुसरणमेव शरणमिति दिक् परंतु यथोद्देशकार्यकाल
पक्षद्वयास्वीकारेपि न क्षतिः न च कार्यकालपक्षास्वीकारे अमुष्ये सादेः वत्वं न स्यात् मुत्वदृष्टापत्वस्यासिद्धत्वात्
कार्यकालस्वीकारे तु आदेशप्रत्यययोः सेत देकवाक्यतापन्नादिरन्येनेत्यस्यासिद्धत्वान्मुत्वशास्त्रेकवाक्यतापन्न
पूर्वत्रासिद्धमित्येतद्घटकपूर्वग्रहणेनाग्रहणान्न दोषः तथा चागच्छत् समगंसी इति इतीत्यादौ अग्रहसंज्ञार्थं यथो
द्देशपक्षो व्यावश्यकः तथा च प्लुतस्यासिद्धत्वात् प्रगृह्यसंज्ञेति न दोष इति वाच्यम् विरामोवसानमिति शास्त्रा
रम्भसामर्थ्येन संस्कारक इत्यस्यासंस्कार्येनासिद्धमिति कल्पनेनादोषात् न चैवमपि आदिरन्येनेत्येतत्सं
स्कार्यत्वस्य ~~[illegible]~~ मुत्वशास्त्रे अभावेन तस्यासिद्धत्वं दुर्वारमेवेत्यमुष्येति दोषो दुरुद्धर एवेति वा
च्यम् आदिरन्येनेत्येतद्व्याख्यामुत्वस्यासिद्धत्वेपि अक्षरसमाम्नायस्य व्याख्यायघटकत्वेन अक्षरसमाम्नाय
इत्यस्यामुत्वस्यासिद्धत्वाभावेन अइउण् इत्येतद्घटक उवो ध्यात्वस्य अदसोसेरिति विधेयत्वेन तस्यापीत्वसं

साध्यांशे बाधाभावात् द्वितीयं वंध्यादिसाध्ये गुणादिष्वपि तस्यासिद्धत्वेऽपि गुणप्रवृत्तिवत् वस्तुतस्तु शास्त्रत्वेनैव
रूपेणासिद्धताबोधना [illegible] त्त्रिपाद्यां संज्ञापरिभाषाणां बोधनाज्ज्ञापनस्यनोपयोग इत्याहुः
पक्षतावच्छेदकावच्छेदेनानुमितित्वावच्छिन्नं प्रति पक्षतावच्छेदकधर्मप्रकारकत्वेन व्याप्यस्य कारणत्वादित्याहुः इत्सं
ज्ञकाहृति कृतसंज्ञायोग्यमिति विग्रहः अत्रेत्संज्ञकत्वमुपलक्षणम् न तु विशेषणं तेन जश्शसोः शिः इत्यादौ इस
सादौ पूर्वमित्संज्ञाया अभावेऽपि न दोषः अवयवानवयवत्वसंदेह इति ननु सूत्रघटकसत्त्वनिरूपितावयवत्व
संदेहो वा लक्ष्यस्थस्य निरूपितावयवत्वसंदेहो वा नाद्यः आवणप्रसङ्गेऽपि सत्त्वनिरूपितावयवत्वस्य
निर्णीतत्वेन संदेहासंभवात् नाप्यन्त्यः आवणप्र० वसनिरूपितावयवत्वाभाववस्य निर्णीतत्वेन तदसंभवा
दिति चेन्नैवम् बोधकनिरूपितावयवानवयवत्वसंदेहस्य संभवेनादोषात् स च संदेहः बोधकत्वसंदेहप्र
युक्तः बोधकत्वसंदेहश्च विशिष्टाद्विभक्तिदर्शनेन अनुबंधानां लोपे दर्शनाभावेन च भवति ॥ अथ
तदभाववत्तानिश्चयमुद्रया तदभावव्याप्यवत्तानिश्चयमुद्रया वा परस्परविरुद्धकोटिद्वयावगाहिज्ञानस्यैव सं
देहत्वेन अवयवत्वसंदेहानवयवत्वसंदेहयोरन्यतरस्य ग्रहणेनैवोपपत्तौ उभयोपादानमसंगतमिति चेन्नैवम् प्र
कृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्यता
वच्छेदकावच्छिन्नप्रकारताकानुमितित्वावच्छिन्नं प्रति प्रकृतसाध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसा

१०

८

ष्यता॰वच्छेदकावच्छिन्नप्रकारतानिरूपिताप्रकृतसाध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्यतावच्छेदका
वच्छिन्नप्रतियोगिताकाभाववत्तावच्छिन्नप्रकारतानिरूपिता च या प्रकृतपक्षतावच्छेदकावच्छिन्ना विशेष्यता

[illegible]

[illegible]

[illegible]

तादृश विशेष्यताकसंशयस्य हेतुत्वमिति वदतां प्राचीनानां मतेन अस्य ग्रन्थस्य सामंजस्यात् तथा च अवयव
त्वसंदेह इत्युच्यमाने एकानानुबंधाद्रसस्यैवावतरणं स्यान्न त्वनेकानां रसस्य अतउभयोपादानम् तथाहि
प्रकृतसाध्यतावच्छेदकमयवत्वम् प्रकृत॰ कसंबंधः स्वरूपसंबंधः तथा च प्रकृत पक्षताव॰ का अनु
वच्छिन्न विशेष्यता अनुबंध निष्ठा विशेष्यता तादृश विशेष्यता निरूपिता प्रकृतसा॰ क स्वरूपसंबंधा
वच्छिन्ना प्र॰ का वयवत्वसत्वावच्छिन्ना प्रकारता अवयवत्वनिष्ठा तादृशप्रकारताकानुमितिः ॥
कानानुबंधाद्रसाकारिका तादृश अनुमितिं प्रति प्र॰ कसंबंधा॰ न प्र॰ सा॰ तावच्छेदकावच्छिन्नप्र
कारतानिरूपिता प्रकृतसाध्यतावच्छेदकावच्छिन्न प्रकृत॰ कसंबंधावच्छिन्न प्रतियोगिताकाभा
ववत्तावच्छिन्न प्रकारतानिरूपिता या प्रकृत पक्षतावच्छेदकावच्छिन्ना विशेष्यता तादृश विशेष्य
ताकं तानं अनुबंधाः बोधकनिरूपितावयवत्ववंतो न वेत्याकारकमेव न तु बोधकनिरूपितावयव

त्वाभाववत्तोनवेत्साकारकमिति व्यतिरेकदृष्टान्तमाह योहीति नन्वप्रतिज्ञाहेतूदाहरणोपनयनिगमनवाक्यानां
क्रमेणाभिलेखनस्योचितत्वेनउदाहरणाद्युत्तरं हेतुलेखनमसंगतमिति वाच्यम् पूर्वानुमानेहेतोःस्पष्टत्वेनालेखने
नादोषात् तथाहि अनुबंधाः बोधकनिरूपितावयवत्वाभाववन्तः बोधकावयवत्वेनोपलब्धिविषय
त्वाभावात् योह्येवमेवद्वसाधनमेव व्यतिरेकोदाहरणं अयंतु न तथेति निगमनवाक्यं च ननु बोधकत्वस्या
निर्णीतत्वेन तदवयवत्वेनोपलब्धिविषयत्वाभावो [illegible] सिद्धिनिर्णीत इतिहेतुरसिद्ध इत्यत आह
तदर्थभूतइति तथाचायंप्रयोगः अनुबंधाः बोधकावयवत्वेनोपलब्धिविषयत्वाभाववन्तः तद
र्थभूते विधेयेकथाव्यदर्शनादिति तथाच पूर्वहेतुर्नासिद्ध इति ग्रंथयोजना अथप्रत्युच्चार
णशक्तिर्मिथ्यातेन वा आद्यपक्षे सन् शब्द सकारत्वपहेतुर्व्यभिचरितः अंत्येमतिनोनका
रे हेतुर्भागासिद्ध इति चेन्नैवम् [illegible] विधेयतावच्छेदकधर्माभावादितिहेतु
कल्पनेनादोषात् नचअस्मत्पदप्रयोज्यविधेयतावच्छेदकनत्वस्यसन्नकारे सत्वेनभागासि
द्धिरितिवाच्यम् विधेयतायां स्वघटितचटकप्रयोज्यत्वस्य विशेषणदानेन अस्मत्पदप्रयोज्यविधे

१०
८

धेयतायां एतन्नकारघटितघटकप्रयोज्यत्वस्याभावेनादोषात् नचैवमपि एतन्नकारघटितासं
पूर्णव्याप्तिधीत्वद्घटकः अम् तत्प्रयोज्यविधेयतावच्छेदकत्वस्य एतन्नकारेसत्वेन
[illegible]
[illegible]
भागासिद्धिरिति वाच्यम् स्वघटितयत्पदाघटितं तत् [illegible] त्वद्घटकप्रयोज्यविधेयतावच्छे
दकधर्माभावादिति हेतुकल्पनेनादोषात् नचैवमपि विभागासिद्धिस्तदवस्थैवेति वाच्यम्
विशेष्यविशेषणभावापन्नस्वं स्वकोपनिबद्धयावत्पदार्थसंकुचितोयःस्वघटितपदाघ
टितघटकप्रयोज्यविधेयतावच्छेदकधर्मस्तदभावादिति हेतुकल्पनेनादोषात्प्रकृतेच
तादृशोधर्मः भत्वावच्छिन्नाव्यवहितोत्तरत्वविशिष्टत्वावच्छिन्नाव्यवहितोत्तरत्वविशिष्टं
नत्वमितितदभावः अनुबंधनकारे अस्त्येवेति नदोषः नचैवमपि कुक्षिमुभिचकमोरनकार
योर्भागासिद्धिरिति वाच्यम् स्याभावादिति हेतुकल्पनेनादोषात् अभावश्चस्वघटित [illegible]
घटकप्रयोज्यविधेयतावच्छेदकधर्मावच्छिन्नत्वस्वघटितघटकप्रयोज्यविधेयतावच्छेद
कधर्माभाववदव्यवहितोत्तरत्वएतदुभयसंबंधावच्छिन्नप्रतियोगिताकः

१६

कुक्षि स्वघटितघटकप्रयोज्यविधेयतावच्छेदकधर्म्मावच्छिन्नत्वसत्वेपि स्वघटितघटकप्रयोज्यविधेय
तावच्छेदकधर्माभाववान् यउकारः तदुत्तरत्वस्यैव सत्वेन तदनुत्तरत्वस्याभावात् एकसत्वेपि द्ध

[illegible]

[illegible]

यंना~~[illegible]~~ सीतिप्रतीत्या उभयसंबंधावच्छिन्नप्रतियोगिताकस्वाभावस्तु अ इ इति न दोषः ॥
नचैवमपि स्वघटितां मध्याध्यायीमादाय सनि नकारे भागासिद्धिरिति वाच्यम् स्वघटितपदा
घटितमिति विशेषणदानेनादोषात् नचैवमपि णिनो इकारे भागासिद्धिरिति वाच्यम् प्र
थमसंबंधघटकधर्मे विशेषणविशेष्यभाव इत्यादि विशेषणदानेनादोषात् नचैवमपि
कुक्षिभागासिद्धिस्तादवस्थ्यैव स्वघटितां संपूर्णामष्टाध्यायीमादाय तद्घटक ~~[illegible]~~
~~[illegible]~~ सनाशंसभिक्ष उरिति उपदप्रयोज्यविधेयतावच्छेदकोत्वस्य कुक्षु उकारे स्ता
दिति वाच्यम् द्वितीयसंबंधे स्वघटित[illegible] सत्रपदाघटितेति विशेषणदानेनादोषात् नचै
वमपि कार्यादिभ्यष्ठक् त्रिठावित्र[illegible] अस्य ठकारे ठुओश्वि इत्यत्र सकारे च हेतुव्याप्ति

१०

शिठ इसत्र इकारे दुओम्पि इसत्र ओकारे च स्वघटितपदाघटितघटकप्रयोज्य विधेय
तावच्छेदकधर्माभाववत्त्वस्य सत्त्वेन तदुत्तरत्वस्यैव ठकारशकारयोः सत्त्वेन तदुत्
तरत्वस्याभावादिति वाच्यम् स्वघटितघटकप्रयोज्यविधेयतावच्छेदकधर्मवदुत्
तरत्वस्य स्वघटितघटकप्रयोज्यविधेयतावच्छेदकधर्माभाववति विशेषणस्य दानेनादो
षात् न चैवमपि स्वघटितं धातुपाठमात्रघटितदुघटक कुङ्पदप्रयो
ज्यविधेयतावच्छेदकोत्वस्य कुङ् इसत्र उकारे सत्त्वेन तदुत्तरत्वस्य ओकारे सत्त्वेन तदुत्
तरत्वमेव शकारे इति पुनरपि व्यभिचारो दुर्वार एवेति वाच्यम् अत्रापि स्वघटितपदाघटिते
ति विशेषणदानेनादोषात् न चैवमपि गुणपदगकारे हेतुर्व्यभिचरितः बोधकनिरूपितावयवत्वरूपसाध्यस्याभा
वात् न च स्वरूपबोधकनिरूपितावयवत्वाभावस्य साध्यत्वेन विवक्षणान्न दोष इति वाच्यम् पर्वतो वह्निमान् वेत्याकारकसंश
यानंतरं पर्वतो महानसीयवह्न्यभाववानिति अनुमानस्यैव प्रकृतसंशयानिवर्तकत्वेन प्रकृतानुमानस्य अप्रयोजकत्वापत्ति
रिति चेन्नैवम् स्वघटितघटकपदजन्यश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्न विषयताप्रयोजकनिरूपितावयवत्वाभावस्य सा
ध्यत्वेन विवक्षणेनादोषात् न चैवमपि स्वं गकारः तद्घटितं गुण इति तद्घटकः अ इति तद्घटितश्रावणप्रत्यक्षविषयतावच्छेदकधर्मः
अत्वं तद्धर्मावच्छिन्नविषयता अदेङ्निष्ठा विषयता तादृशविषयताप्रयोजकं अदेङ्गुणपदं तन्निरूपितावयवत्वमेव गकारे इति व्यभिचारो

साक्षात्स्वघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नत्व[illegible]विषयतायां विवक्षणेनादोषात् नचैवमपि स्थाण्वोऽ
[illegible]कारइत्यादौ ककारव्यभिचारः तथाहि स्थं ककारः तद्घटितघटकः अ इति तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मः
अत्वं तद्धर्मावच्छिन्नाविषयता प्रकृतविधेयनिष्ठा । विषयता तत्प्रयोजकं अकार इति तन्निरूपितं अवयवत्वमेव ककारे इति वा
च्यम् (साक्षात्) स्वघटितघटकं यत्स्वेतर यावत् तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नत्वस्य विषयतायां निवेशनेनादोषात्
नचैवमपि स्वंसनु इतिनकारः तद्घटिताऽष्टाध्यायी तद्घटकस्वेतरयावद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्न
विषयताप्रयोजकावयवत्वाभावस्य निश्चयेपि अनुबंधावबोधकावयवा न वेति संशयाऽनिवर्तनादप्रयोजकत्वम
नुमानस्येति वाच्यम् स्वघटितं यत्पदाऽघटि~~[illegible]~~तमिति विवक्षणेनादोषात् नचैवमपि स्वं नका
रः तद्घटितं भ्यः सन्निति तद्घटकं स्वेतर यावत् भ्यः स इति तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्माव
च्छिन्नविषयताप्रयोजकनिरूपितावयवत्वाभावनिश्चयेपि पूर्ववत्पुनरपि अप्रयोजकत्वं तदवस्थमेवेति वा
च्यम् स्वघटितं यद्भिन्नत्वघटितं इति विवक्षणेनादोषादिति दिक् हलन्त्यमित्यत्रान्त्यशब्दः परसमीपबोध
सा क इति चिन्त्य[illegible]मिदं समाद्युपपत्तये समीपेऽवयवत्वारोपस्यावश्यकत्वेन तेनैवोपपत्तौ परसमीपबोधकत्वस्योपयोगाभा
वात् व्याख्यानतो निर्णय इति दक्षचश्चकारवैयर्थ्येन अनुबंधेषु स्वसमभिव्याहृतनिरूपितावयवत्वमारोप्यते स्वाघटितं
यत्पदं तद्घटकावयवत्वं नारोप्यते अथवा स्वघटितं यत्पदाघटितं पदं तद्घटकनिरूपितावयवत्वमनुबंधेषु आरो
प्यत इति व्याख्यानेनेत्यर्थः

५.
१०

द्वितीयकल्पे पदाघटितमित्युत्याविशिष्टसमासरूपंपदमादायनदोषः ननु लोपश्चेतिद्विशकारको [illegible] निर्देशः द्वितीयः शकारइम्इतिअ
लोस्यातस्तस्यभाष्यविरोधः लोपश्श इतिसमुदाये पदत्वाभावात्तदघटितत्वाभावाच्च प्रथमकल्पेपि स्याघटितं पदं लोपइति
मवनीतिनिषेधविषयसत्वाच्च एवं उपदेशो किं अम्अओअटितः इतिभाष्यादिविरोधश्च ओंअटितइतिसमुदाये पदत्वाभावात्
पदाघटि० च पृथ० पदं अटितइतिमवतीति निषे० त्याश्चेतिचेन्मैवम् · स्वसमभिव्याहृतत्वस्याघटितं अनुबंधेतरघटितं न
यत्पदं तदघटत्वं एतदुभयसंबंधेनस्वविशिष्टस्वरूपितमवयवत्वमारोपणीयमितिकरणेनेनादोषात् शइस्य ओंइस्य च
अनुबंधेतरघटितत्वस्याभावेननदोषः स्वसमभि (व्या) आहृतत्वेति संबंधदानेन आदेशमात्रस्यनशित्वमिति दिक् ननु
तदर्थमूतइ[illegible]त्यादिहेतुरानङ्नकारेव्यभिचरितः वक्ष्यमाणहेतुनासत्प्रतिपक्षितश्च नच अनेनहेतुनावक्ष्यमाणहेतुरेवस
त्प्रतिपक्षितोभवति तस्मिन्पक्षेनानु[illegible]बंधेतिपरिभाषात्रयस्यावश्यकत्वेन तस्य पक्षस्यगौरवग्रस्तत्वा[illegible]दितिवाच्यम्
अनुबंधघटितबोधकत्वयोये अनुबंध[illegible]तघटितानुपूर्व्यतिरिक्ताधर्मास्तान्निमित्तके कार्ये कर्तव्ये अनुबंधानाम
वि[illegible]यमानवद्भावोमवतीति कल्पनेनगौरवानवकाशात् प्रस्तुत अनेकान्तवादिमते विशिष्टाद्विभक्तिः सौत्रीकेव
लाविभक्त्यनुत्पत्तिश्चसौत्री पदेकिंतंत्रयुतमितिभाष्यालापनाय डाजीत्यादिः इत्संज्ञकअकाराव्यवहितपूर्ववर्ति
बोध्येलक्षणाचस्वीकर्तव्या किंच यदा अनवयवत्वं तदा दृष्टाचश्चकारवैयर्थ्यम् यदावैयर्थ्यं तदारोपाधि
ष्टानकल्पनायदाकल्पनातदेत्संज्ञायदेत्संज्ञातदालोपः यदालोपस्तदालक्ष्येऽदर्शनम् यदाऽदर्शनंतदाऽनव
यत्वमिति चक्रकमितिहेतुरसिद्धिदोषग्रस्ताइत्यरुचेराह वस्तुनस्त्विति तत्रोपलब्धमादन्यत्रानुपलब्धमाञ्जेति
तत्रोपलब्धिविशिष्टान्यत्रोपलब्ध्यभावादित्यर्थः

२०

न च उत्पन्नविनष्टघटे व्यभिचारः तस्मिन् घटे संयोगेन चक्षुरुपलम्भादन्यत्रानुपलम्भाच्चेति हेतोः सत्त्वेन
साध्यस्याभावादिति वाच्यम् तत्रोपलब्धिविशिष्टान्योपलब्धिसंभावनाविषयत्वाभावस्य हेतुत्वेनादो
षात् न चैवमपि गन्धे व्यभिचारः तत्र पृथिव्यवयवत्वस्याभावेन समवायेन पृथिव्यामेवोपलब्धेश्चेति वा
च्यम् वैयाकरणानां सांख्यानुयायित्वेन तन्मते गुणक्रियासमुदायातिरिक्तद्रव्यस्यानङ्गीकारे
ण पृथिव्यवयवत्वस्य गन्धे सत्त्वात् वस्तुतस्तु अयुतसिद्धत्वप्रतिपादकोऽयं ग्रन्थः तथाहि ययोर्द्वयोर्म
ध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ यथा गुणगुणिनौ क्रियाक्रियावन्तौ जाति
व्यक्ती अवयवावयविनौ नित्यद्रव्यविशेषाश्चेति तथा च गुणगुणिभावादेर्वाच्यत्वादवयवावयविभा
व एवावशिष्यत इति अनुबन्धेषु बोधकावयवत्वसिद्धिः हेतुश्च विशिष्टाद्युभक्तिदर्शनमेव तथाहि
अनुबन्धाः बोधकावयवाः व्युत्पत्तिनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटकत्वात् घटश[illegible]द
घटकघकारवत् इति दिक् परन्तु मूलोक्तकाकदन्तपरीक्षातुल्यम् बोधकावयवत्वस्यानवय
वत्वस्य वा निर्णये फलाभावात् आरब्धेत्यादौ इत्संज्ञकटकाराव्यवहितपूर्वीयआतद्घ्ये लक्षणाया
अङ्गीकर्तव्यतया एकान्तपक्षस्य अनेकान्ततुल्ययोगक्षेमत्वापत्तेश्च अन्यथा छिन्द्धि इत्यादौ टकारे
इत्संज्ञकाकाराद्व्यवहितत्वसत्त्वेन ष्ट्यापत्तेः णे अण् अयुक्तकार्याणामापत्तेश्च तस्य लोप इत्यादौ

५०
११

स्वशास्त्रसंकेतार्थं विहाय शाब्दबाधविषयत्वाभावार्थकत्वस्यान्याय्यत्वात् तस्मा[दे]तत्पक्षद्वयेपि विशि-
ष्टाद्विभक्तिदर्शनेन अनुबंधेषु बोधकावयवत्वमस्त्येव तस्माद्बोध्यावयवत्वमेकान्तत्वं बोध्यानवयवत्वम-
नेकान्तत्वमिति सिद्धान्तः इत्यसत्त्वे लोपोपि चलत्वस्यैव लोपश्चादर्शनमेव एवं चानुबाध्येसनीसादौ न लक्ष-
णेति एकान्तवादिमते लाघवं फलम् न च एकान्तस्य तत्रोपलब्धेरिति भाष्यप्रतीकमादाय तत्रैवोपलब्धे-
रित्यर्थः यो हि संशायकः स एव निर्णायकः कथं भवतीति चेत् यदा सहकृतेरिति वाच्यम् इष्टापत्तेः सं-
शायकेनापि धूमादिहेतुना कार्यकारणभावाद्यनुकूलतर्कसहकृतेन निर्णयजनकत्वस्य दर्शनेन लाघ-
वरूपानुकूलतर्कसहकृतस्य तत्रोपलब्धेरितिहेतोः निर्णायकत्वे बाधकाभावात् अतएव भाष्ये
एवं पदं नोक्तम् न च इदमरर अणत्वात् सवर्णग्रहणं प्राप्नोतीति भाष्यविरोध इति वाच्यम् उपदेशे किम्
अम्र औ अटितेः पदे किम्तत्रयुत्तम लोपश्चेति द्विशकारको निर्देशः इत्यादिभाष्याणामिव इदमपि
भाष्यमनेकान्तपक्षाभिप्रायेण प्रवृत्तमिति तद्विरोधाभावादित्याहुः अन्ये तु बोधकावयवेष्वनु-
बंधेषु बोध्यावयवत्वमारोप्य तद्दत्त्येकान्ताः नारोप्यत इत्यनेकान्ताः तथा चानुबाध्येसनीसादौ लक्ष-
णायाः नोपयोग इति न का कर्त्ता परीक्षा समानं मूलोक्तं अतएव इदमइरर अणत्वात्सवर्णग्रहणं

प्राप्नोतीतिभाष्यंसङ्गच्छत इत्याह: शिद्ग्रहणंव्यर्थमिति ननु एतन्मते अनुबंधविनिर्मुक्तपदार्थोपस्थिते
स्स्वीकारेण आदेशे अनेकाल्त्वाभावात् शिद्ग्रहणंव्यर्थम् नच बोधकत्वसनेकाल्त्वस्य सर्वादेशता
प्रयोजकत्वस्वीकारेण न दोष इति वाच्यम् पादस्य लोप इत्यादौ लोपस्यापि सर्वादेशतापत्तेः नच लोपश्च्येति द्वि
शकारकोनिर्देशः द्वितीयः शकार इत् इति भाष्यप्रामाण्येन भावरूपादेशस्थले बोधकत्वसनेकाल्त्वं सर्वादेशा
ताप्रयोजकमिति न दोषः नच मोनुस्वार इत्यादेरपि सर्वादेशतापत्तिरिति वाच्यम् निर्दिश्यमानपरिभाष
यादोषाभावादिति वाच्यम् अत्रानुनासिक इत्यादौ अनुनासिकादेः सर्वादेशतापत्तेरिति चेन्न अनेकाल्त्वजाति
धर्मावच्छिन्नविधेयताश्रयस्य सर्वस्य स्थाने भवतीसर्थकरणे न शित्वस्य वैयर्थ्यात् अथवा अनुबंधघटि
तबोधकवृत्तिधर्माणां बोध्ये आरोपो भवतीति औशवृत्ति अनेकाल्त्वमौ इत्यत्र यातीति शिद्ग्रहणं सूत्रे
व्यर्थम् अथवा स्थानिवद्भावेन औशवृत्ति अनेकाल्त्वं ओ इत्यत्र यातीति शिद्ग्रहणंव्यर्थम् नच अनेकाल्त्वस्य
अल्व्याप्यधर्मघटितधर्मत्वेन अनल्विधाविति स्थानिवद्भावनिषेध इति वाच्यम् नव्यपीतिसाप
केन अनुबंधघटितबोधकावृत्तिः अतिदिदिक्षितोऽल्व्याप्यधर्मघटितो धर्मः तान्निमित्तकेविधौ
स्थानिवत्त्वेसर्थकरणेन स्थानिवद्भावनिषेधाप्रवृत्तेः नानुबंधकृतमनेकाल्त्वम् प्रथमकल्पे अ
नेकालादेशः सर्वस्य स्थाने भवतीसर्थकरणेन अर्वणस्तृ इत्यादौ आदेशे अनेकाल्त्वाभावान्न सर्वादेशत्वं

५०
१२

द्वितीयकल्पे च अनुबंधघटितबोधकत्वेनानां अनुबंधत्वघटितानां आनुपूर्वीरूपाणां च धर्माणामारोपो भवती
ति ओश्शब्दसने कालत्वस्य आरोपो न भवतीति शिद्ग्रहणं सार्थकं तृतीयकल्पेपि दृत्पदार्थनिष्ठविशेष्यता
निरूपितप्रकारतावच्छेदकोतरीयो [illegible] व्याप्यो धर्मो भः तद्घटितो यो धर्मः अतिदिदिक्षितश्च तन्नि
मित्तके विधौ कर्तव्ये स्थानिवत्त्वम भवतीति नत्यपीति ज्ञापकात्कल्पनेन अनेकाल्त्वं स्थानिवद्भावेन नायातीति
शिद्ग्रहणं सार्थकम् वस्तुतस्तु अनुबंधघटितबोधकत्वेन यो या आनुपूर्वी भिन्ना अनुबंधत्वघटितातिरिक्ता
श्च धर्मास्तन्निमित्तके विधौ कर्तव्ये अनुबंधानामविद्यमानवद्भावः शिद्ग्रहणेन कल्प्यत इति न कोपि दोष इति दिक्
आनुपूर्व्यास्सर्वादेशत्वासिद्धमिति नच जसः शी इति सूत्रशेखरविरोधः तत्रानेकाल्त्वात्सर्वादेश इति कौमुदीस्थ
उनावसरे अनुबंधत्वमनुबंधयोग्यत्वमित्युक्तत्वेन डादिविषयेपि एतत्पन्थ [illegible] सत्त्वात् लुटः प्रथमस्य
ति सूत्रे डा आ इति परस्मैपदानामित्यत्र अ इति शेखर [illegible] तत्प्रश्ने पर्यवसानपतिश्चेति वाच्यम् एतस्य
ग्रंथस्य प्राचीनानुसारित्वेनाविरोधात् केचित्तु सर्वादेशत्वमित्यस्यासिद्धमित्यमान्वयः किन्ते एतदभावेन सर्व
नरं [illegible] नीयम् [illegible] अपीतिच्याध्याहर्तव्यम् तथाच डादिविषये अनुबंधत्वाभावेन विनापि अनुबंध
[illegible]
त्वाभावाभावेपि अनुबंधत्वेपीति यावत् सर्वादेशत्वासिद्धम् कथं आनुपूर्व्यात् डा आदि सादिअक्षेपा
दित्यर्थः तथा च न जसः शी इति सूत्रशेखरविरोध इत्याहुः परे तु यथाश्रुतमेव सुयोजम् तथाहि डा

२४

दिविषये एतत्परिभाषाप्रवृत्तिर्न भवति उपजीव्यविरोधात् एतत्परिभाषा(बा)प्रवृत्त्याऽडादेः सर्वादेशत्वाभा
वे तच्च प्रत्ययत्वस्य दुर्लभत्वेन ङकारादौ इत्संज्ञायाः ~~अप्र~~ अप्रवृत्त्या अनुबन्धत्वविघातः स्पष्ट एव जसः शी
~~[illegible]~~त्यादौ अनेकाल्त्वात् सर्वादेशाभावे विरोधात् सर्वादेशो भवत्येवेति तत्र स शेखरेऽपि सङ्गत
इत्याहुः जयसीताराम अनेजन्तत्वादात्वाप्राप्तेरिति यत्तु पकारसत्त्वेऽपि दैङ्त्सत्र एजन्तत्वस्य सत्त्वादेजन्तत्वाभावादि
स्यो पदिश्यमान एजन्तत्वाभावादित्यर्थः एवं परिभाषायामपि अनेजन्तत्वमित्यस्य उपदिश्यमान एजन्तत्वाभावादित्यर्थ इति तन्न
दैप् इति धातौ उपदिश्यमानत्वसत्त्वेऽपि एजन्तत्वाभावेनावतरणासंगतेः अत एवानुबन्धपरत्वमनुपदिश्यमानत्वमिति भाष्ये नो
त्तम् परिभाषयापि पकारसत्त्वेऽपि धातोरेव एजन्तत्वबुद्धिः क्रियते तथा च यत्किंचित्समुदायविशिष्टत्वम् अन्तत्वम् वैः
स्वघटकत्व, स्वघटकानुबन्धेतरवर्णप्रागभावानधिकरणक्षणवृत्त्युत्पत्तिकत्व, एतदुभयसंबन्धेन न चाल्लोन्त्यपरिभा
षया अन्त्यपकारस्य आत्वापत्तिरिति वाच्यम् निर्दिश्यमानपरिभाषया एच एवात्वविधानात् धातोरित्यस्य निवृ
त्तेरिति अत एव उपदेशे किम् गाम्यां नो म्यामिति भाष्यं सङ्गच्छते इति दिक् कविषये डणोऽप्याप्तिरिति स्यादेतत्
वा सरूपसूत्रे असारूप्यमौपदेशिकं वा गृह्यते प्रायोगिकं वा नाद्यः असरूपपदवैयर्थ्यापत्तेः नाप्यन्त्यः अवतर
णासङ्गत्यापत्तेरिति ~~चे~~ चेन्नैवम् औपदेशिकासारूप्यग्रहणेनावतरणासङ्गतेः न चासरूपपदे वैयर्थ्यमिति वाच्यम्
आभ्रधन इत्यादौ वध्यादेशसंनियोगशिष्टापूर्वत्वस्याचरितार्थत्वात् न चैवमपि अनङ् इत्येव सिद्धे असरूप

५
१५

पदस्यार्थमितिवाच्यम् तद्धंपरिमज्जनः श्रीः कटपूरिसादौ इत्युपधेयाकारस्य क्षिपत्येतीत्यपञ्चवारणेनचरिता
र्थत्वात् अन्यथात्वंदस्यपरिमज्जनः श्रीः कटकुरादसाधापत्तेरितिदिक् प्रकरणस्याभिधानियामकत्वसिद्धा
दिति यत्तु अनाभिधापदेनतात्पर्यंग्राह्यम् यत्तु अभिधापदेन शक्तिरेव ग्राह्या इति तन्न वैयाकरणमते शक्तेर्बो
धजनकतात्वस्वत्वेन जनकतायाः स्वरूपसंबंधरूपत्वात् शब्दानां नित्यत्वेन तत्स्वरूपजनकतायाअपि नित्यत्वे
न तन्नियामकत्वासंभवात् नैयायिकमतेपि शक्तेरीश्वरेच्छारूपत्वेन ईश्वरस्यनित्यत्वात्तदिच्छायाअपि नित्यत्वे
न तन्नियामकत्वासंभवाच्च पदपदार्थयोः संबंधान्तरं शक्तिरितिवादिनां मीमांसकानां मतेपि पदानां नित्य
त्वेनं अर्थस्यापिनित्यत्वेन प्रवाहनित्यत्वेन तत्संबंधस्यापि नित्यत्वेन तन्नियामकत्वासंभवाच्चेत्यादि केचिद्
शास्त्र इति अवच्छेदकसंसर्गाभावः तथाच कश्चित् [illegible] नियमस्यैव [illegible] चिदर्थनियमस्यैव धात्विद्युभय
गातेरिति व्यवस्थासिद्धेरितिभावः नियमत्वायोगाद्दिति स्यादेतत् इदं वाच्यं पदं अर्थवाचकं पदत्वात् गो
पदवदित्यनुमानेन अर्थत्वेन आदेः वाचकमिति नियामकत्वसंभवमेव न च अर्थत्वस्य उपलक्षणतया उप
लक्षितधर्मप्रकारकशाब्दबोधस्यानुदयात् स्वत्वस्य नियामक
त्वं न सम्भवतीति वाच्यम् [illegible]
[illegible]
[illegible]
[illegible]

२६

న చ వాహ ఊఠ్ ఇతి సూత్రే ఊఠ్ గ్రహణేనాంతరంగ పరిభాషాయాం జ్ఞాపితాయామకరి భాషుయాం సంప్రసారణస్య బహిరంగతయా సిద్ధత్వేపి పూర్వ
== రూపస్యాసిద్ధత్వభావేన గుణే వృద్ధ్యేకతాయాం మూర్ధగ్రహణస్య సాఫల్యమితి వాచ్యం। సంప్రసారణాశ్రయే కార్యే సంప్రసార
== ణే యద్యధర్మాసిద్ధస్య తేవృత్తిదిశ్యంతే। తథాచ సంప్రసారణస్యైవ పూర్వరూపస్యాప్యసిద్ధత్వాద్గుణాప్రాప్తౌ తదితార్థ మూర్ధగ్రహణం॥ అత్రవ
ర్ణానాం వాల ఇతి న సంప్రసారణే సంప్రసారణం ఇతి వా। వాల ఇతి సూత్రం తు పరాంత ఇష్ట్వత్ర దీర్ఘార్థం విధానార్థం। యది సంప్రసారణాశ్రయే కా

वि) विशेषधर्मप्रकारकशक्तिज्ञानाभावदशायां उपलक्षणीभूतधर्मप्रकारकशाब्दबोधस्याङ्गीकारेण
नियामकत्वसंभवात् अत एव न मानबोधेतदनंतरं कमानुपामीति प्रमः सङ्गच्छत इति चेन्मैवम्
स्वरूपतः आदैचत्वप्रकारक ~~आदै~~ बोधं प्रति स्वरूपत आदैचत्वप्रकारकशक्तिज्ञानस्य कारणत्वेन
ता६।१।१ त्रिगत्यर्थे वृद्धिरादैच् वृद्धसादीनां विधायकत्वसंभवेन नियामकत्वायोगात् ननु सर्व
पदं सर्वार्थवाचकं इति व्याप्तिज्ञानबलेन वृद्ध्यादिपदं आदैच्त्वावच्छिन्नवाचकं पदत्वात् गोपद
वदित्यनुमाने तु स्वरूपत आदैच्त्वप्रकारकशक्तिज्ञानस्यापि संभवसत्वेति संस्कारमाणां निया
मकत्वसंभवसत्वेतिचेदाह नास्मदुक्तेति न बोधोपयोगीति विशेषधर्मप्रकारकबोधोपयोगि
न भवतीत्यर्थः सामान्यधर्मप्रकारकज्ञानं सामान्यधर्मप्रकारकबोधं प्रत्येवोपयुज्यते न विशेष
धर्मप्रकारकबोधं प्रति अन्यथा घटत्वप्रकारकशक्तिज्ञानात् घटत्वप्रकारकशाब्दबोधापत्ति
रिति दिक्

शयितेति यत्नतः जंगमेन तु [illegible] निष्ठा शीङ् इत्यत्र शीङ् सामर्थ्येन गुणो भवतीति वक्तुं शक्यत्वा-
दिति तन्न परिभाषाया अभावे शीङ्ग्रहणवैयर्थ्यस्यापि दोषत्वेन वक्तुं शक्यत्वात् अत एव [illegible] अनुक्तस-
मुच्चयार्थक चकारस्य [illegible] नन्वे क्ङिति चेति सूत्रे [illegible] साहचर्यात् क्ङित् [illegible] एव ग्रहणं स्यात इत्य-
क्तेता शयितेत्यादौ न दोष इति वाच्यम् एवमपि अश्रौति कामयते इत्यादौ ङितः प्रसक्तस्य संभवेन सा-
हचर्याश्रयणेऽपि दोषस्य दुर्वारत्वात् स्यादेतत् क्ङितीति परसप्तमी स्वीकारान्न [illegible] दोषः नन्व-
कथयति परमकथयतीत्यादौ गुणनिषेधः स्यादिति वाच्यम् अंतरङ्गे निषेधकर्तव्ये बहिरङ्गस्य गुणस्य
असिद्धत्वेनादोषात् न चैवमपि भि [illegible] इत्यादौ [illegible] परत्वाभावेन गुणनिषेधो न स्यादिति वाच्यम्
ङ्णेः किले न एकवर्णव्यवधानसहनेनादोषादिति चेन्नैवम् अंतरङ्गो दुपजीव्याद पि निषेधो बहि [illegible] रङ्गे
वानेदं सेतदर्थक निषेधाश्चयकीयसि [illegible] परिभावयाभवत इत्यादौ निषेधापत्तेः नच [illegible] रापकसाजा-
त्यादृत्व्यवधाने सहत्वत इति न दोष इति वाच्यम् अत्रैव [illegible] मित्यादौ निषेधापत्तेः नच धात्ववयव
वर्णव्यवधानं सह्यत इति प्रकृतेन दोष इति वाच्यम् गुतेत्यादौ निषेधानापत्तेरिति दिक् निर्देशश्चे-
ति चेन निष्ठा शीङ् सूत्रस्थ शीङ्ः सङ्गतिः अन्यथा शीङोङित्वेन गुणनिषेधस्य दुर्वारतया ततः परनिष्ठाया अकि-
त्वविधानं व्यर्थं स्यात्

तस्येति समवायिकारणस्येत्यर्थः तत्त्वेन निमित्तकारणत्वेन वस्तुतस्तु चिन्त्यमिदम् शब्दानां नित्यत्वेन कारणत्वस्यैवासम्भवेन समवायि
कारणत्वादेः सुतरामसम्भवात् शब्दानामनित्यत्वकल्पेऽपि शब्दबुद्धिकर्मणां द्विक्षणावस्थायित्वेन स्वनाशोत्तरोत्पद्यमानशब्दस्य स्वका
रणत्वासम्भवाच्च शब्दस्य गुणत्वेन गुणकर्मणोरसमवायिकारणत्वमिति सिद्धान्तेन शब्दस्य समवायिकारणत्वासम्भवाच्च
न्यायवैशेषिकेतरमते समवायिकारणासमवायिकारणादिविभागाभावेन समवायिकारणनिमित्तकारणयोर्भेदस्य सकललोकतन्त्रास

[illegible]

[illegible]

[illegible]

[illegible] सिद्धत्वेऽप्युक्तेरसङ्गतेश्च
नच परनिमित्तोजादेशः इत्यादिरसङ्[illegible] तेति वाच्यम् ज्ञाननिमित्तं कारणत्वं विपर्यये आरोप्य तादृशव्यवहारोपपत्त्या असङ्गतित्वस्याभावादिति
भाष्ये ध्वनितेति केचित्तु अचि किं जेघ्रीयते देध्मीयते इति भाष्यमेतत्परिभाषायाः सत्त्वे न सङ्गच्छते तथाहि नद्भावार्थ [illegible]
निमित्तत्वेनाश्रयणाभावेन भाष्यासङ्गति [illegible] कार्यानुमवकतत्त्वेन तस्य निमित्तत्वेनाश्रयणाभावेन भाष्यासङ्गति
स्पष्टैव तथाच मूले भाष्ये अध्वनितेति च्छेद इत्याहुः अन्ये तु [illegible] प्रकृतपरिभाषा प्राचीनपठिता तत्र
कार्यमनुभवन्निसंशोभाष्ये ध्वनितः तथाहि लक्ष्यानुसारात्स्वरात्परे व्यंजनान्मुत्तरस्येति पक्षः स्वीक्रियते तथाच नाचि किं
जेघ्रीयत इति भाष्यासङ्गतिः तथाच एतत्परिभाषायाअभावे ई घ्राध्मोरितीत्वस्य आतः स्थाने जायमानत्वेन ईत्वस्या
ज्निमित्तकत्वेन अचीति परस्सप्तमीदोषस्य दुरुद्धरत्वेन भाष्यासङ्गतिरिति प्रथमांशो भाष्ये ध्वनित इत्याहुः अन्ये तत्त्वम्
सम्पूर्णा परिभाषा भाष्ये ध्वनिता तथाहि द्विर्वचनेऽचीत्यस्य द्वित्वनिमित्ते अचि परत इत्यर्थो वा अजादौ द्वित्वनिमित्ते परत इत्यर्थो वा
नाद्यः चक्रतुरित्यादौ निषेधानापत्तेः नाप्यन्त्यः जग्मतुरित्यादौ उपधालोपनिषेधानापत्तेः तस्मात् यथा कथंचित् द्वित्वनिमित्तत्वा
श्रयो योच् तत्स्[illegible]नि[illegible]त्वाकादेशो नेत्यर्थः तथाच सन्यङोरिति षष्ठीत्वेन यङन्ताघटकेषु सर्वेष्वेव कथंचिद् द्वित्वनिमित्तताश्रय

२८

प्रत्ययसन्निपातस्म... ... नानिमवंतीति केच्चित् स्वरानंतरे व्यञ्जनानुत्तरस्येति केच्चिच्च भाष्यासंमतिरिति संपूर्णपरिभाषाधननं स्पष्ट
मेव न च ऊर्णुनुविषतीत्यादौ गुणनिषेधो न स्यात् गुणस्य यथाकथंचित् द्वित्वनिमित्तताश्रयाच्पर्याप्तनिमित्तताकत्वाभावादिति वाच्यं
गुणस्य निषेधाभावेपि अवादेशस्य यथाकथंचित् द्वित्वनिमित्तताश्रयाच्पर्याप्तनिमित्तताकत्वेन तन्निषेधेन नोशब्दस्य द्वित्वे ह्रस्वे
च रूपसिद्धेः अत एव अरिरिषतीत्यादौ गुणे रिशब्दस्य द्वित्वमिति तत्सिद्धिः न चैवमपि दुद्यूषति सुस्यूषतीत्यादौ यणः यथाकथं
चित् द्वित्वनिमित्तताश्रयो ऊठ् पर्याप्तनिमित्तताकत्वेन तन्निषेधेभ्यासे उकारो न श्रूयेतेति वाच्यम् द्विर्वचनेचीति निषेधप्रसंग
स्य भावसम्भावनायां यस्य कार्यानुभवकर्तृत्वं सम्भाव्यते तस्यापि निमित्तत्वेनाश्रयणं न भवतीति परिभाषार्थकरणेनादोषात्
अस्ति च प्रसक्ते यदि द्विर्वचनेचीति निषेधो न स्यात् तर्हि यणि ऊठो द्वित्वरूपकार्यानुभवकर्तृत्वसंभावनेति दिक् परंतु द्वित्वनि
मित्ततापर्याप्त्यधिकरणो यः प्रत्ययः तद्घटकाच्पर्याप्तनिमित्तताकादेशो नेति द्विर्वचनेचीत्यस्यार्थ इति अरिरिषतीति दु
द्यूषति सुस्यूषतीत्यादौ कुत्रापि न दोषः [struck out] ऊठ् ... कारयोः द्वित्वनिमित्तता...पर्याप्त्यधिकरणप्रत्यया
घटकत्वात् अत एव बिभवनीयिषतीत्यादौ उपसंजनिष्यमाणन्यायेनावादेशनिषेधो न अच्येतावयिते इत्यादौ परसवर्णाश्रया
यणादेशेन दोषः क्नोः कित्वकरणेन च यं प्रत्ययं निमित्तीकृत्य गुणो वा द्विर्वा भवति तत्प्रत्ययाव्यवहितपूर्वो यस्तत्प्रत्यय
तदाद्यवयवो वर्णस्तदवयवानां स्यात् इति भवतः कृता अक्ष्णामित्यादौ कुत्रापि न दोषः परमकवयतीत्यादौ अंतरंगपरिभाष
या वारणं कृतमेव एवं च अचि किं जेघ्रीयते देध्मीयत इति भाष्यमपि सुयोजमेव आकारस्य द्वित्वनिमित्ततापर्याप्त्यधि
करणप्रत्ययघटकत्वाभावेन अचीति पदसत्वे दोषाभावात् [struck out] तदसत्वे च दोषात् गाङ्कुटीत्यत्र ङित्वकारकोनिर्देशाद्
ति लिङवस्थायामेव गाङादेश इति अधिजगे इत्यादौ न दोषः एवं चेयं परिभाषा निर्मूला निष्फला च भाष्येऽदृष्टा चेत्याहुः ॥

दापेनं स्यादिति स्यादेतत् दाविदारूपत्वाभावे पितद्रु टके दाराव्दे दारूपानपायात् घुसंज्ञामवसेयं न च अर्थवद्दा [illegible] रूपाभावेन घुसंज्ञा न स्यादिति वाच्यम् एतावत्पर्यंतं यदागमपरिभाषाया अभावेन दाशब्दे अर्थवत्वानपायादिति चेन्नैवम् अर्थवत्वस्य तौ किं कोन्वय व्यतिरेकसाध्यत्वेन यदागमपरिभाषानपेक्षणात् अतएव

[illegible]

मा [illegible] वकाम वाचिनि परत इदमु त्यमाने स्तीयुक्‌विशेषित इति स्यात्सिन्न सीकुरु इत्सूत्रस्थं भाष्यं अपदानादिति किंकोत्र [illegible] कोरत्व: न चार्थव [illegible] मादोष: एवं तर्हि [illegible] इत्यपदानादितिसूत्रस्थभाष्यं प्रसंग व्यहते आगमसमभिव्याहारे आगमविशिष्टे एवार्थवत्वस्वीकारणमूयात् इति साक्षाद्विलोपः रामाणामित्यादावदकोप्यनमवतः न च गानामागम विरोधः इति परिभाषयावाह्यतात् मतिपदोक्तपरिभाषा निरनुबंधकपरिभाषार्थवत्कृतपरिभाषाणामप्रवृत्तिबोधतेन [illegible] अर्थवत्वाभावेनापि घुसंज्ञा भवत्येवेति वाच्यम् जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वे सति निपातनत्वरूपोपसर्गत्वस्य प्रकृते घुजन्यबोधाभावेन घुनिरूपितानिरूपितोपसर्गत्वाभावेन तत्वाप्रवृत्तेः एतेन यथोद्देशपक्षे पूर्वं जाताघुसंज्ञा इदानीं वर्तत एवेति तीदमवतरणमसङ्गतमेवेत्यपास्तम् न च पूर्वं धातुरुपसर्गेण युज्यत इति कल्पे प्रनिदाद्धतिदशायां घुसंज्ञार्थवत्वयोः सत्वात्वसंभवसंसेति [illegible] मिति वाच्यम् तत्रास्ति [illegible] वेन [illegible] घुनिरूपितोपसर्गत्वाभावेन णत्वे

५

१६ एतन्मूलकमेव पठ्यते असिद्धशास्त्रप्रवृत्तिप्रतिबंधकस्याबाधिकाशास्त्रप्रवृत्तिसंभावनायां पूर्वमेपादिकं
नप्रवर्तत इति न चैवमपि पुंकोवहि भूत[illegible]निमित्तकत्वेन । सिद्धत्वा[illegible]न्नाहिरजतत्वमप्रसक्ता प्रवृत्तिः शु
किंनगोचरयतीति न्यायेन दा[illegible]प्येव दाबुद्ध्या घुसंज्ञायां तन्निरूपितोपसर्गत्वसत्त्वेन पात्वमवश्ये
स्ववतरणमसंगतमिति वाच्यम् संज्ञाशास्त्राणां विधिनिमित्तनिमित्तकत्वेन पालस्यपदत्रयनिमित्तकत्वेन
घुसंज्ञाया अपि पदत्रयनिमित्तकत्वेन तस्याः एव बहिरङ्गत्वात् अतएव यः सः इत्यादिरूपस्यागिरस्य
नो अ[illegible]न्यथा अन्तरङ्गायां गुणसंज्ञायां कर्तव्यायां स्यदाप्यत्वस्य नवहिरङ्गासिद्धत्वं तदङ्गीकारे च
गुणे अजानन्तर्यत्वेन नाजानन्तर्य इति निषेध्यानदोषः अतएव सोऽस्यास्तीति तस्मै हितमित्यादिनिर्दे ॥१२॥
शास्त्रकृतमिति दि[illegible]क् यदागमा इति यस्यागमास्य यदागमाः अवयवत्वावच्छिन्नविधेयताश्रयत्व
मागमत्वम् उद्देश्यत्वं निरूपितत्वं वा वस्त्वर्थः आद्ये विधेयतायामन्वयः अन्ये अवयवत्वे अन्वयः त
याच यदागमा इत्यस्य यन्निष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयाय निरूपितावयव
त्वावच्छिन्नविधेयताश्रया इति वा अर्थः इदमनुतारवाक्ये हेतुः तद्घटीभूता इति आरोपितत्वव्यर्थः तथा
चेतन्निरूपितावयवत्वमंत इत्यर्थः इदमपि उत्तरवाक्ये हेतुः तद्ग्रहणेन ग्रहणात् इति आगमग्रहणेन

32

आगमविशिष्टागमनादित्यर्थः आगमनिष्ठविधेयतानिरूपितोद्देश्यताश्रयपर्याप्ताधर्मी आगविशिष्टेऽतिदि-
श्यना यावत् आगमवैशिष्ट्यं च स्वघटितत्व, स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटितत्व, स्वविशिष्टाघटितत्व,

[illegible]

एतत्त्रितयसंबन्धेन वै· स्वाधारकत्व, स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयाधारकत्व, एतदुभयसंबन्धेन प्रथमसं-
बंधोपादानेन आगमस[illegible]मभिव्याहारे केवलस्य नग्रहणं द्वितीयसंबंधोपादानेन केवलागमस्य नग्रहणं तृतीय-
संबंधोपादानेन अधिकस्य नग्रहणं द्वितीयवैशिष्ट्ये अन्यतरसंबन्धानुपादाने आगमविशिष्टस्यागमग्रहणापत्तिरिति द्वि
कं यमुद्दिश्य आगमो विहित इति चिन्त्यमिदम् अवयवत्वावच्छिन्नविधेयताश्रयस्य आगमपदार्थत्वेन [illegible] विधेय-
ताश्रयस्य विहितपदार्थत्वेन च तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नेऽसत्त्वे अभेदेनान्वयबोधस्य व्युत्पन्नतया
एतादृशप्रयोगस्य दुरुपपादत्वात् घटो नीलघट इतिवद्विधेयांशे अधिकावगाहिशाब्दबोधोदयेन एतादृश-
प्रयोगोपपादनेऽपि विहितपदवैयर्थ्यात् ननु तत्र आह कं प्रति आगमित्वम् अत आह तद्बोधकेनेति उपपादितमेतत् दारि-
अस्येति अवयवावयवः समुदायावयवो भवतीति न्यायेन रेफस्य विशिष्टावयवत्वात् अदपयवासात्त्वग्रहणे
नग्रस्य न दृस्युच्यमाने दारिस्य व्युसंज्ञा स्यादिति सामामूद्दिश्येदर्थं यमुद्दिश्येति वक्तव्यमिति भावः
न च अवयवावयवदितिन्यायोऽस्मिन् शास्त्रे न स्वीक्रियते यमुद्दिश्ये त्यपि नोच्यते तथा च प्रतिनिरास्य-
तीत्यादौ न दोषइति वाच्यम् शेरतेऽत्यादौ रुङ्गुणार्थमावश्यकत्वात् न च अदभ्यस्तादित्यतः प्रागेव
प्रतिपदविधित्वात् पूर्वं गुणे पश्चाददादेशे उक्तलक्षण्या[illegible] सिध्या न्यायस्य नोपयोग इति वाच्यम्

१७ आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वार्त्तिकेन सूत्रे एव अक्षादेशप्रवृत्ता रूढगुणयोः प्रासयोः पर
[illegible]निमित्ता रूटि गुणार्थन्यायस्यावश्यकत्वात् एवंस्य [illegible] द्यतीत्यादौ [illegible] स्वस्य लुकि लुग्विशिष्टस्य
पद्दत्वेति कुंतिङ् रूसस्य प्रवृत्तसर्थन्यायस्यावश्यकत्वात् [illegible] न च तास्मिन्निति परिभाषोपस्थितावयवहि
तपूर्वस्येत्येतद्दिशो व्यावृत्त तदंतविधौ रूस्यांतस्यैव लुगिति न दोष इति वाच्यं देवदत्ता शिव [illegible]
द्यतीत्यादौ देवदत्तः शिवेत्यस्य लुकि लुकाव्यवधानेन पदात्परत्वाभावात्स्वरानापत्तेः ननु शोरतद्दसा
दाविव प्राणिदारयतीत्यादावपि अवयवावयवन्यायेन आगम विशिष्टस्य समुदायग्रहणेन ग्रहणा
हुसंसादुर्धरैवेति चेदत्र केचित् अवयवावयवविधानात्स्थागवयवस्य यत्समुदायघटकत्वं
तादृशसमुदायग्रहणेन अवयवावयवविशिष्टस्य ग्रहणं भवति तथा च शोरतद्दसादौ अवय
वावयवस्य रूटः विधानात्स्थागवयवस्य अ[illegible]स्य अतेशब्दघटकत्वमिति अतेशब्द
ग्रहणेन रूड्विशिष्टग्रहणं भवति प्राणि निदारयतीत्यादौ तु अवयवावयवरेफविधानात्स्थाग
वयवस्याकारस्य नदाघटकत्वमिति दाशब्दग्रहणेन दारिसस्य ग्रहणमित्याहुः परे तु अव
यवावयवन्यायस्यानशास्त्रे नोपयोगः यदागमाद्दसत्रोद्दृश्यता अपर्याप्त्याधिकरणतेय
रं तु आगम विधानात्स्थागागमनिष्ठाविधेयतानिरूपितोद्देश्यताश्रयस्य यत्समुदायघट

[illegible]

कर्तृत्वं तादृशसमुदायेऽवोद्देश्यता आपर्याप्त्यासीत्क्रियते तथा च शरित इत्यादौ रुड्विधानात्स्वा
- कृ रु द निष्ठविधेयतानिरूपितोद्देश्यताश्रया च्छ ब्दस्य अतेः शब्द घटकत्वमिति आपर्याप्त्या
तत्रोद्देश्यतायाः सत्त्वेन यदागमन्यायेनैवाविशिष्टे सार्वधातुकत्वलाभः दारयतीत्यादौ तु
रेफविधानात्प्राग्रेफनिष्ठविधेयतानिरूपितोद्देश्यताश्रयाकारस्य न दाघटकत्वमिति तत्रा
पर्याप्त्योद्देश्यत्वस्याभावेन यदागमन्यायेन न दारिसस्य धुत्वम् अत्र च प्रकृतसूत्रस्थं
भाष्यमेव मानमिति प्राहुः तद्वैयर्थ्यं स्पष्टमेवेति न च पचअ आन इति स्थिते आतो मुगिति मुग्विधानं इमादेश
बाधनार्थं चरितार्थमिति वाच्यम् आतो ङित इत्यसत्त्रनान इति या अन्तादिति वा न्यासेन इयादेशबाधे सिद्धे मुग्विधानवैयर्थ्यात् न चै
वमपि अमू अ इति अकं ठोष्ठस्थानिकस्य अकं ठोष्ठस्थानिकदीर्घविधानार्थं मुग्विधानं चरितार्थमिति वाच्यम् यदा
गमन्यायेन अकार इति कंठमात्रस्थानिकात्वस्य मकारविशिष्टे आनयनेनादोषात् अन्यथा तु पादमात्रिक एव मुक्कि वि
धानत्वे अर्धमात्रिकमुग्विधानमेतदनित्यत्वे ज्ञापकं न च पाद मात्रिकवर्णसत्त्वे प्रमाणं नास्तीति वाच्यम् ओर्गुणश्च

५०
१८

नन्तरः शाकटायनस्येति सूत्रस्य अर्थं विसर्गसदृशाविति प्रतीकमादाय पादमात्रिका विमाविति भावः इति शब्दरत्ने ग्रन्थस्य पादमात्रिक-
वर्णविधायककात्यायनसूत्रस्य च प्रमाणत्वात् इत्याहुः वस्तुतस्तु युटः सिद्धत्ववचनमेतस्यासिद्धत्वे ज्ञापकम् अन्य आदिदीये त्यादौ अ
आदित्वमादाय यणि तद्वैयर्थ्यं स्पष्टमेव अप्रयोजनत्वमिति वाच्यमिति नन वर्णग्रहणे इत्यस्य आगमविमनिष्ठविधेयतानिरूपितोद्देश्यता-
श्रयपर्याप्त वर्णत्वव्याप्यधर्मघटितो धर्मो नायातीति अर्थो वा आगमा इति वर्णमात्रवृत्तिविषयताप्रयोजकपदप्रतिपाद्यतावच्छेद-
कधर्मो नायातीत्यर्थो वा आगमिनिष्ठवर्णत्वव्याप्यधर्मो नायातीत्यर्थो वा तत्र क्रमेण भाष्यविरोधानाह पच्यमान इत्यादिना
ङमुट् इति सूत्रस्थभाष्यासङ्गतेरिति पदानात्वस्य वर्णमात्रवृत्तिविषयताप्रयोजकपदप्रतिपाद्यतावच्छेदकत्वादिति भावः आगमा-
नामागमिधर्मबोधे स्यबोधनं तु चिन्त्यमेव रामाणामित्यादौ सर्वनामित्यादौ चानुवृत्तिपदानात्वस्य च आगमे आनयनेन णत्वणत्वयोरना-
पत्तेः केसायंतनेत्यादौ तुट् अनुवृत्तिपदानात्वस्यानयनेन त्रत्वापत्तेश्च ननु पदानामत्स्तद्ग्रहणेन ग्राहिष्यत इति भाष्यलापनं कथ-
मिति चेन्न त्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिक पदानात्वाश्रयस्य नत्वं न भवतीत्यर्थ इति कु-
र्वन्नास्त इत्यादौ नकारद्वये पदानात्वस्यानयनेन तदाश्रयस्य पूर्वणकारस्यापि णत्वनिषेध इति केचित् परे तु पदानोयो नकारः तद-
वयवस्य णत्वं न भवतीति भाष्यं सुयोजमित्याहुः नियमो नस्याः इति परे तु आगमा इति वर्णत्वव्याप्य धर्मघटितो धर्मो ना-
यातीति भ्रुविधानेन ज्ञाप्यते न च अड्वदेरामत्स्तद्ग्रहणेनेति भाष्यविरोधः अदन्तत्वस्य वर्णव्याप्यात्वघटितत्वादिति वाच्यम्
अधोगित्यत्र इदानीं दादित्वाभावेपि उपदिश्यमानदादित्ववत् प्रकृते पि उपदिश्यमानादन्तत्वस्य अम् शब्दे असत्त्वे - अर्थात्
- दादित्ववत् अदन्तात्परस्मुपलक्षणमिति उपदेश इति बोधयति न च गुणो भवति वृद्धिर्भवतीति भाष्यविरोधः गुण-
त्ववृद्धित्वयोर्व्यपदेशिवद्भावेन वर्णव्याप्यधर्मघटितत्वादिति वाच्यम् गुणवृद्धिसंज्ञकरेफशिरस्कः सन् अमिति निर्वर्तित
इति भाष्यज्ञापनेनादोषात् न चैवमपि गुणवृद्धी अरारावेवेति नियमानुपपत्तिरिति वाच्यम् रेफविशिष्टे गुणत्ववृद्धि

त्वयोरभावेपि अकाराकारयो रेफावयवकत्वस्य सत्वेन रेफावयवकस्य रेफावयवक इति नियमोपपत्तेः अथवा अनान्तर्यमेवैतयोः
सान्तर्यम् अनान्तर्यं च आदेशविशिष्टत्वं वे. स्वघटितत्व स्वेतरयावदादेशाघटितत्व, स्वदलभिन्नदलीयघटितत्व, एतत्त्रितय
[illegible]
सं[illegible]त्वेन एवं स्थानिवैशिष्ट्यमनान्तर्यं वे. स्वघटितत्व, स्वेतरयावस्थान्यघटितत्व, स्वदलभिन्नदलीयघटितत्व एतत्त्रितयसं
तथा च कर्त्रित्यादौ आर्त[illegible]याभावे स्थान्यादेशयोर्निरुक्तवैशिष्ट्यस्य सत्वान्न दोषः न च अचोऽञ्णितीत्यादौ [illegible]कारस्य आर
इति नियमानुपपत्तिः कं[illegible]मात्रस्थानजन्यत्वे स्थान्यादेशयोरकाराकारयोर्वैशिष्ट्यस्य सत्वेन अनान्तर्यस्याभावादि
ति वाच्यम् अत उपधाया इत्यतो अत इत्यनुवृत्त्या मात्रपरिवेषणन्यायेनाकारातिरिक्तस्यैवाचो वाक्यभेदेन वृद्धिविधा
नेनादोषात् अत्र चेदमेवमाव्यमानं मम अयं च पक्षः रेफस्थानागमत्वं कल्प्येन वमहा [illegible] इन्दु इत्यादौ आगमो[illegible]नुस्वा
र विशिष्टअत्वस्थानानयने मोमगोरिति यत्वानापत्तिः अत्वस्य व्यपदेशिवद्भावेन वर्णत्वव्याप्यधर्मघटितत्वादिति वाच्यम्
अयोगवाहा विसर्गा आश्रयस्थानभागिन इति शिक्षया विसर्जनीयानां स्वराणां चेति वचनेन अकारानुस्वारयो[illegible]ः
स्थानप्रयत्नैक्येन सवर्णसंज्ञायां ग्रहणकशास्त्रेण अकारग्रहणेन [illegible] अनुस्वारस्य ग्रहणेनादोषादित्याहुः
सिंहावलोकन न्यायेन परिभाषायां ज्ञापकमप्याह अत एव नेटीत्यादि ननु स्थानिवत्सूत्रेणैवेयं परिभाषा गतार्था तथाहि नि से पुंशब्दे वागम
विधानान्यथानुपपत्त्या आगमरहितस्य स्थाने आगमसहितआदेशो भवतीत्येवरयं बलात् यां प्रतिपाद्य प्रतीत्यादौ स्थानिवद्भावेनैव सा विद्
शब्दत्वभावायास्येव सत आह अयमर्थ इति अर्थापत्तिमूलकेति अर्थापत्तिर्हि द्विधा श्रुतार्थापत्तिर्दृष्टार्थापत्तिश्चेति तत्राभावव्यतानिश्चयमुद्र
य यान्तर्भावव्याप्यत्वानिश्चयमुद्रया वा परस्परविरुद्धत्वम् इत्यतानेन अमर्थापत्तेर्विषयः तथा च प्रस्तुते श्रुतार्थापत्त्या वाक्यान्तरकल्पनेति बोध्यम्
साक्षादष्टाध्यायी बोधितेति शान्तवाव लक्षणाया पाणिन्यानुच्चरितपदजन्यबोधविषयीभूतस्थान्यादेशभावे स्थानिवत्सूत्रस्य चारितार्थ्येन अर्थापत्तिक

५

१९

ल्पितवाक्यजन्यबोधविषयीभूतस्थान्यादेशभावविषये एतत्सूत्रप्रवृत्तौ प्रमाणाभावादिति भावः ननु स्थानिवत्सूत्रे आदेशग्रहणसामर्थ्येन पाणिनितात्पर्यविषयीभूतआदेशभावस्य स्थानिवत्सूत्रे ग्रहणं तथा च अर्थापत्तिकल्पितवाक्यजन्यबोधविषयीभूतादेशस्यापि पाणिनितात्पर्यगोचरत्वेन प्रणिदापयतीत्यादौ न दोष इति चेदत्राह किंचेत्यादि स्यादेतत् लावस्थायामङिति पक्षस्यासिद्धवत्सूत्रप्रसारणाभावात्तेन सुमनिष्ठ इत्यादौ तत्सूत्रस्यावश्यकत्वेन तत्र सारव्यानस्य पूर्वपक्षयुक्तित्वेन अविवदिहादौ परत्वात्तिबादेशपक्षे आदिन दोषः न च रमायामित्यादौ याटि आमश्चाप्राप्तितात्पर्येण तत्कृन्यायेन आमा आदौ बाधे पुनर्याड् न स्यादिति वाच्यम् इदमोम इति ज्ञापकेन तत्कृन्यायस्यानित्यत्वादत्र तौ परत्वाद्याडिति पुनःप्रसङ्गन्यायेन याडिति तात्पर्यं नचैवमपि अरुदितमरुदितेत्यादौ परत्वादिडिति तद्विशिष्टस्य तामाद्यादेशापत्तिरिति वाच्यम् प्रतिपदविधित्वादनाङ्कत्वाच्च तामादिषु ततदपि चेत्सिद्धे प्रति चेन्मैवम् एधिषीय पस्पर्धिध्व इत्यादौ परत्वात्सीयुडिटो स्तद्विशिष्टस्य असयादेशयोरापत्तेरिति दिक् ॥ पूर्वं सर्वं णिपालिरिति न च इत्यत्र सत्र सकारप्रश्लेषेण न दोष इति वाच्यम् ~~भवितेत्यादौ विशिष्टस्य डादेशाभावाय~~ पस्पर्धिध्व इत्यादौ विशिष्टस्य से इत्यादेशाभावाय परिभाषाया आवश्यकत्वेन प्रश्लेषस्यानुपयोगात् सूत्रमावर्ततइति अयंभावः सूत्रे यत इति शेषः यतः षष्ठीसा स्थानपदार्थानुयोगिकसंबंधप्रतियोगिनीत्यर्थः फलितमाह षष्ठ्यन्तामिति षष्ठ्या अन्तामिति षष्ठीतत्पुरुषः अन्तशब्दः समीपवाची तथा च षष्ठीप्रकृतिरित्यर्थः ननु षष्ठीप्रकृतिः स्थानीत्युक्ते न तत्र स्थानपदार्थानुयोगिकसंबंधप्रतियोगित्वसंभव इत्यत आह षष्ठीप्रकृतिसजातीयमिति साजात्यं च स्वरूपेणेति श्रावणप्रत्यक्षविषयतावच्छेदकधर्मेण ननु यूयवयोजस्यित्यादौ स्थानपदार्थानुयोगिकसंबंधप्रतियोगित्वमपर्यन्तस्य युष्मदस्मदोरिति अतियूयमित्यादौ अतियुष्मद् इत्यस्य स्थाने यूयाद्यादेशापत्तिरत आह निर्दिश्यमानावयवरूपमिति वा शब्दप्रयोजनं चिन्त्यम् षष्ठीप्रकृतिसजातीयावयवः स्थानपदार्थानुयोगिकसंबंधप्रतियोगी भवतीत्यर्थः नैवं सर्वसामञ्जस्यात् न च षष्ठीप्रकृतिसजातीयत्वं यदि निर्दिश्यमानत्वं तर्हि अतिस्यदित्यादावुपसर्गतकारस्यसत्वं भवितेत्यादौ विशिष्टस्य डादेशापत्तिश्च स्येषु षष्ठीसजातीयत्वाभावादिति वाच्यम् षष्ठीप्रकृति

प्रकृति

जन्यप्राथमिकोपस्थितिविषयत्वं निर्दिश्यमानत्वमिति स्वीकारेणादोषात् उपस्थितौ प्राथमिकत्वं च शास्त्रान्तराऽसहकृतशक्तिग्रहा
धीनत्वम् ननु अस्मच्चाविसाशौ अपदेन अणुदित्सूत्रसहकारेणैव दीर्घादीनामुपस्थितिरिति निरुक्तप्राथमिकोपस्थितिविषयत्वरूप

[illegible]

[illegible]

निर्दिश्यमानत्वाभावान्नाणीभवतीत्यादावीत्वनापत्तिरिति शंकते नन्विति जातिपक्षे दोषाभावादिति अस्मिन्पक्षे परग्रहस्य
प्रसारव्यातत्वेन शास्त्रान्तराऽसहकृतशक्तिग्रहाधीनोपस्थितिविषयत्वरूपानिर्दिश्यमानत्वस्य दीर्घेऽपि सत्वादिति भावः
नमुस्सुधियोरिति निषेधेनेति अणुदित्सूत्रातिरिक्तशास्त्रान्तराऽसहकृतशक्तिग्रहाधीनत्वमुपस्थितौ प्राथमिकत्वमिति परिष्कारेणा
दोषादिति भावः ननु इकोयणचीति यणो निषेधेन तच्चरितार्थम् न च तेनापि निर्दिश्यमानपरिभाषया दीर्घस्य यण्न प्राप्नोतीति
वाच्यम् निर्दिश्यमानानिर्दिश्यमानयोर्यत्र कार्यं भवति तत्रैवैतत्परिभाषाप्रवृत्तेरिति चेन्न इकोयणचीत्यनन्तरमेव निषेधे
कर्तव्ये एतत्प्रकरणे करणेनोक्तार्थज्ञापनसंभवात् अन्येतु नमुस्सुधियोरिति निषेधेन सस्य वर्णाश्रयेति शास्त्रेऽजसर्थः [illegible]
[illegible] नमुस्सुधियोरिति निषेधयतीति नमुस्सुधियोरिति निषेधः वर्णाश्रयेति प्रतिप्रसवशास्त्रत्वेन नमुस्सुधियोरिति शास्त्र
निषेधकत्वं वर्णाश्रयेत्यस्य स्पष्टमेव न च वर्णमूशब्दादाचारक्विबंतान्नपुंसकह्रस्वे पुंवद्भावकल्पे न वर्णाश्रयेति चरितार्थ
मितिवाच्यम् तेन पुंवद्रूपातिदेशेन दीर्घान्तकुङ्घा ओस्रूपीतियणोऽप्राप्तेरित्याहुः केचित्तु नमुस्सुधियोरिति इयङ्घातितो
च्चारणेन निरुक्तार्थो ज्ञाप्यते न च सुधीशब्दादाचारक्विबंतात्कर्तरि क्विपि नपुंसकह्रस्वे तस्यैवानुकरणमिति न निर्देशासङ्गतिः
न च इकोचीति नुमापत्त्या निर्देशासङ्गतिर्वाच्यम् पुंवद्भावेनादोषादिति वाच्यम् पुंवद्भावेन दीर्घान्तरूपातिदेशेन इयङोऽभावात्
निर्देशाऽसंगतेरित्याहुः

५.

२०

वस्तुतस्तु तृतीयादिष्विति शास्त्रेण पुंसि यानि कार्याणि भवंति तान्यतिदिश्यंते [illegible] प्राधान्यादिति न वर्णान्त्य इति सूत्रवैयर्थ्यं नापि नमूस्कु

धियोरिति निर्देशाद् सङ्गतिरिति चिंतनीयम् अन्त्यादेशसाये ति चिन्त्यमिदम् इयं चावयव षष्ठी विधेयेति च [illegible] समासेन इवर्णो वर्णा

नौ यो [illegible] ऋधातुभ्रुवः तदंतं पदङ्गं तदवयवो यो निर्दिश्यमान इत्याद वयवो यो निर्दिश्यमानः त

स्येङ्कुवङाविति [illegible] येन ङि तत्प्रयोजनस्य दुरूपपादत्वात् भाष्ये [illegible] विरोधादिति यत्तु वर्णग्रहणेइत्यस्य अ

ल्ग्रहणे इत्यर्थः तथा च अयोगवाहानां वर्णत्वेपि अल्त्वाभावेन न भाष्यविरोधः अतएव एरुरित्यादौ आनुमानिकस्थान्यादेशभावक

ल्पे इवर्णस्य स्थाने नो वर्णानामादेश इति तन्न इदोयपुंसि इत्यादौ वर्णग्रहणाभावेन आनुमानिकस्थान्यादेशभावकल्पे इदः स्था

ने निर्दिश्यमान परिभाषया अय् घटितादेशापत्तेः अर्थग्रहेषु स्थान्यादेशभाव विश्रांतिरिति शब्दतोऽर्थतश्च आनार्थवानादेशो

भवतीति [illegible] समाधानस्य एरुरित्यादौ अपि तुल्यत्वाच्चेति दिक् ननु देवीमस्त्वाती तिदेव [illegible] इत्यादाव [illegible] आदेशानापत्तिः अ

ते निरूप्य [illegible] निर्दिश्यमानत्वस्याभावात् न च अंते निर्दिश्यमानत्वं नैवास्तीति वाच्यम् महेदात्वेलिङ्गविशिष्टपरिभाषाऽनि

त्या महती प्रियेति भाष्यविरोधात् एवं निर्जरसौ इत्यादौ जरसादेशानापत्तिः स्थानिवत्सूत्र सहकारेणैव जरइत्यस्योपस्थितेः न

चेष्टापत्तिः स्नानस्य स्थानिवत्व प्राति षेधो वक्तव्यो न वक्तव्यः सकृत्कृतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति भाष्यविरोधात्

एवं भवितेत्यादौ विशिष्टस्य द्वाप्यादेशापत्तिः प्रथमपदेन तिङ्स्त्री [illegible] णीति शास्त्रसहकारेणैव तिपस्तङ्गीनामुपस्थितेः नचेष्टा

पत्तिः इति किमुदाहरणं कानि तान्योरणि ताश्च इति दाधीयेवी [illegible] यामिति सूत्रस्थ भाष्यविरोधात् एवं बभूवेत्यादौ विशिष्ट

स्य णलाद्यादेशापत्तिः लः परस्मैपदमिति शास्त्रसहकारेणैव परस्मैपदेन तिबाद्युपस्थितेरित्यादि दूषणगणापातः [illegible]

न च प्राथमिकत्वपरिष्कारघटकशास्त्रान्तरे तत्तच्छास्त्राभिन्नत्वेन संकोचान्न दोष इति वाच्यम् अतिगौरवादिति चेदाह अन

येत्यादि तथा च येन विधिर्यदागमा एतच्छास्त्रद्वयासहकृतशक्तिग्रहाधीनमेवोपस्थितौ प्राथमिकत्वमिति भावः

[illegible]

अन्ये [illegible] नु यत्तदघटितशास्त्रासहकृतशक्तिग्रहाधीनत्वमुपस्थितौ प्राथमिकत्वमित्याहुः

स्याद् एतत् जरायाजरां जराजरा तस्मादौ विमतौ पूर्वजराशब्देऽपि निरुक्तनिर्दिश्यमानत्वसत्त्वाज्जरसापत्तिः न च अचि विमतावित्य

निर्दिश्यमाने विशेषणान्न दोष इति वाच्यम् अङ्गस्य प्रत्ययांशे उपस्थितत्वात्तया तस्मात्त्रैवान्वयस्योचितत्वादिति वक्ष्यमाणत्वेन निर्दि

दिश्यमाने विशेषणासम्भवात् एवं व्याघ्रपात् पदङ्घ्रादौ पूर्वपादत्वस्यापि निर्दिश्यमानत्वेन पदादेशापत्तिः न च मसंज्ञाक्षिप्तप्रत्यय

स्य निर्दिश्यमाने विशेषणान्न दोष इति वाच्यम् आक्षेपमानाभावादाक्षिप्तस्य शाब्दे अनन्वयात् येन यदाक्षिप्तं तस्य तत्रैवान्वयस्यौचि

त्यात् एवं स्नात्वाकालकइत्यादौ क्त्वा यो ल्यबापत्तिः समासघटकनिर्दिश्यमानक्त्वायास्सत्त्वात् न च क्त्वान्तोयः समासस्त

त्स्यार्थकत्वेन न दोष इति वाच्यम् स्नात्वाकालकीत्यस्यादौ पूर्वक्त्वायाः ल्यबापत्तेर्दुर्वारत्वादिति चेन्मैवम् षष्ठीप्रकृतिजन्य

शाब्दबोधीयविषयताश्रयसमभिव्याहृतवर्णाघटितत्वस्याति षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयत्वं निर्दिश्यमानत्व

मिति परिष्कारेण पूर्वजरापांक्त्वासु षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताया अभावात् न च देवीमंचतीति देवद्र्यङ्इत्यादौ यस्या

देशानापत्तिः षष्ठीप्रकृतिजन्यविषयताश्रयसमभिव्याहृतस्त्रीप्रत्ययघटितत्वादिति वाच्यम् षष्ठीप्रकृतिजन्य~~[illegible]~~ शाब्दबोधी

यविषयताश्रयसमभिव्याहृते वर्णे स्त्रीप्रत्ययातिरिक्तत्वेन विशेषणेनादोषात् न चैवमपि अपिबदित्यादौ लावस्थायामडिति पक्षे पाइस्य

स्य पिबादेशानापत्तिः आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वेन अर्थवत्त्वाभावस्य पाशब्दे अभावेन षष्ठीप्रकृतिजन्यशा

ब्दबोधीयविषयताया अस्तु नाभावादिति वाच्यम् येन विधिरिति परिभाषावद्यदागमपरिभाषापि लक्षणायाहकेति स्वीकारेणादोषात्

तु

५०

२९ स्वविशिष्टघटितत्व, एतत्[illegible]सम्बन्धेन वै॰ च स्वाघटकत्व स्वनिष्ठोद्देश्यतानिरूपिताविधेयतावच्छेदकविधेयताश्रयघटितत्व एतदुभयसंबन्धेन एवं यदागमं परिभाषाविषयेसर्वत्र निरुक्तत्रितयसंबन्धेन स्वविशिष्टत्वलक्षणा आङ्गीकर्तव्या स्यादेतत् व्याघ्रपा स्यसत्वात्पदादेशापत्तिः एवं जराइत्यस्य पदद्वित्वेजराजराइतिजाते तस्यतु वंतत्वादशब्देनसमासे तस्मादो विभक्तो विषष्ठीप्रकृतिविशिष्टप्रकारताश्रयत्वं निर्दिश्यमानत्वमितिस्वीकारेणादोषात् वै॰ च स्वपर्याप्तप्रयोजकतानिरूपि तप्रयोज्यतावत्व, स्वप॰ तावच्छेदकविशेष्यतानिरूपितत्व स्वजन्यशाब्दबोधीयत्व, एतत्रितयसंबन्धेन सुपदः निर्जरसा दौ अनात्वनिष्ठविशेष्यतानिरूपितजराशब्दत्वावच्छिन्नाप्रकारता पात्वद्वत्वावच्छिन्नाचप्रकारतानिरुक्तत्रित यसंबन्धेन षष्ठीप्रकृतिविशिष्टा भवतीति न कुत्रापि दोषः वस्तुतस्तु षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयत्वमेव निर्दिश्यमानत्वम् न च जराजरसाविसादौ पूर्वजराशब्दस्यजरसापत्तिःरितिवाच्यम् अचि विभक्ताविसस्य निर्दि श्यमानविशेषणेनादोषात् न च अङ्गाशेषस्येत्यो दयितांदन्त येष्ट्र[illegible]स्यादि वक्ष्यमाणेगत अविरोध इतिवाच्यम् सन्नन्थोऽस्त्विति वक्ष्यमाणत्वात् न च व्याघ्रपात् पद इत्यादौ पूर्वपादिस्य पदादेशापत्तिरितिवाच्यम् कार्यकालपक्षे यचिभमिसस्योपस्थितिः सा यचीत्यस्या एतत्वान्निर्दिश्यमानविशेषणस्वीकारेणादोषात् स्वपंचेदमङ्कोपोनइति सूत्रेभाष्ये न च आकाङ्क्षारीयमपदसंस्थाविषये यथोद्देशपक्षाएवेत्युक्तत्वेन यचिभमिसस्य तत्रोपस्थितिरेव न भवती

तिवाच्यम् अष्टाध्यायीपाठक्रमतः पूर्वस परस्यैव सर्वत्र व्यवस्थापकत्वेन कार्यकालस्वीकारेपि दोषाभावात् न च स्मात्याकालिक
इत्यादो स्यपा पतिरिति वाच्यम् एकानोयस्य मात्र इत्यर्थेनादोषात् न चैवं स्मात्याकालिकीकसेष्यादौ पदापत्तिवाच्यम्
मयूर व्यंसकादय इत्येत च कारैण एवंसमासान्तरे घटकतया प्रवेशोनम्भवतीति भाष्ये उक्तत्वेन निरुक्तप्रयोगस्येवाभा
[illegible]
वादितिदिक् तद्योगादिति परस्परं स्वीयोद्देश्यतावच्छेदकाक्रान्तलक्ष्यासमवेन गुणानां च परार्थत्वादसंबंधः समत्वादि
तिन्यायादिति भावः [illegible] उदस्यादिति लक्ष्ये इति शेषः सूत्रविषय इति उदस्थासांमो [illegible] रितिसूत्र विषये
इत्यर्थः अकृज्विषयेनायं न्याय इति ननु भिंधकीसत्रानारकृत्वादक चिचिर्नस्यादिति भाष्यविरोध इति चेदत्र के
चित् साकच्कानपहारकादेशविषयेनायंन्यायः भिंधकीसत्र स्यादेशस्य साकच्कापहारकत्वेन अर्थन्यायः प्रवर्त
त इति न भाष्यविरोधः अत एवानाप्यक इत्यकग्रहणं [illegible] चरितार्थम् अत एव कैयटेन किमः क इत्यस्यापि निरूपा
दीक्षितेन च इमः अः इत्येव सिद्धे किमः क इति सूत्रकरणेन च अकाज्विशिष्टस्य कादेशः साधित इत्याहुः परे तु भिंधकी
सत्र तत्र प्रवृत्तिरेव नास्तीति न भाष्यविरोधः तथाहि स्वघटकाव्यवहितपूर्वत्व स्वघटकाव्यवहितोत्तरत्व स्व
निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्व एतत्त्रितयसंबंधेन स्वाविशिष्टसंतत्र प्रवृत्तित्वम् प्रकृते च तत्रिष्ठोद्देश्यतानि
रूपितविधेयताश्रयस्य कोचिदभावान्न भाष्यविरोधः केचित्तु तत्र प्रवृत्तम् इमः अ इति न्यासे साकच्कानपहार
केनादेशस्याभिनिर्दिश्यमानपरिभाषया अकृत्तौ कक इति रूपं यथा श्रुतन्यासे साकच्कापहारकत्वेनादेशस्य कश्य
इति रूपमितिप्रभेदेन मनोरमाया असङ्गतेरित्याहुः अन्ये तु [illegible] विषय इत्यस्य पयपीसादिः कार्यजनना

५
२२

वि सस्य तथापि अन्तरङ्ग ... इत्यपि निर्दिश्यमानत्वाभावादिति संन ... प्रामाण्यप्रयेन निर्दिश्यमानपरिमा
णाप्रवर्तत इति शेषः नन्वनाप्याकृतिरस्तु एवं अकग्रहणं व्यर्थं इमकेने स्यादौ निर्दिश्यमानपरिमाणयैव
वारणादिति चेत् ... दाह ... यज्ञविषये पीति निर्दिश्यमानावयवस्य मुपलक्षणमि
ति स्वीकारेण अकग्रहणसार्थक्यादित्याह: अतिस्य इति अतिशायितः स्यो अतिस्य इति वि
ग्रहः — अकारो विस्यादिति न च यस्मिन् धर्मे स्थानिवैशिष्ट्यं आदेशवैशिष्ट्यं च स एवादेशनियामकः वै-
शिष्ट्यं च पूर्वोक्तमेव तथा च एकमात्रिकत्वे स्थेतरयावत्स्थान्यप्रतियोगिनात्वाति एकमात्रिकत्वमादेशनियामक
-मेवनं भवतीति इयं परिमाणाव्यर्थेति वाच्यम् अयोऽग्निनी स्यादौ ओष्ठस्थानजन्यत्वे स्थानिवैशिष्ट्याभावेन उकारा
देः स्थाने ओष्ठस्थानजन्यत्वेन औकार एव भवतीति नियमानुपपत्तेः स्थानार्थगुणप्रमाणकृतमिति न च प्रमाणस्यापि
गुणत्वादेव सिद्धे प्रमाणग्रहणं वैयर्थ्यमिति वाच्यम् ब्राह्मणवसिष्ठन्यायेन पृथग्ग्रहणात् न चैवमपि स्वसमभिव्याहृत
पदार्थतावच्छेदकव्याप्यधर्मविशिष्ट्याप्यधर्म बोधनस्य विध्यपदार्थत्वानुपपत्तिः गुणत्वप्रमाणत्वयोर्विरुद्धत्वादि
ति वाच्यम् गुणत्वत्वप्रमाणत्वत्वादिकमादाय विध्यपदार्थत्वोपपत्तेः अनेकविधानार्थसत्तागमकमिति अनेकविधमानार्थमा
देशानां नियामकमिति यावत् नात्र गमकमित्यर्थः एतेन अनेकविधानार्थस्य ... इति न तत्र गमकापेक्षेति
इदमसङ्गतमित्यपास्तम् न च हरीणामित्यादावेकारादेशवारणाय तमपृथग्ग्रहणमावश्यकमिति वाच्यम् तत्र स्थान इति वा स
स्थान इति वा सिद्धे स्थानेऽन्तर इति गुरून्यासकरणेन अन्तरपदमनारतमार्थकं भविष्यतीति तमपृथग्ग्रहणस्य गमकत्वसम्भवात्

तत्समानवर्णेति अत एव चरणशब्दस्य स्थाने अपदादेशः नापि अम्भः शब्दस्य स्थाने उदकादेशः अन्यथा आपादि उदकात् अभिस्तव चरण
शब्दस्य नपुंसकत्वेन नुम् ओजः सहोम्भस्तमस्तपसः टच् स्यात् ननु पदादेः प्रकृतसमानार्थकेति भाष्ये प्रकृतेः स्थान्यादेशभावएव नास्तीति
[illegible]
[illegible]
अर्थतो नैतदुदाहरणमिति चेदाह तत्र च स्थानी इति ननु एतस्यापि प्रयोगनियमार्थस्य तस्य भाष्ये उक्तत्वेन नैत[illegible] दप्युदाहरण
मिति चेदाह चेति चेनानुमानिकस्थान्यादेशभावकल्पने अर्थत इत्यस्य आदेशभावस्योदाहरणमिति समुच्चीयते प्रमाणतोदसो सेरिति ह
स्वव्यंजनयोरेकमात्राधिककालशून्यत्व मान्तर्यमिति संक्षेपः — उपस्थितस्यार्थस्येति अर्थे शक्तिः पदे लक्षणेति केचित् — नै.
वै.वि.१ अन्ये तु पदे शक्तिः अर्थे लक्षणेत्याहुः परे तु — यो॰ न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते इत्यभियुक्तोक्तेः पदविशिष्टेऽर्थे शक्तिः
पदे लक्षणेत्याहुः अपरे तु — वै.वि.— अर्थविशिष्टे पदे शक्तिः अर्थे लक्षणेत्याहुः मा[illegible]प्रकारास्तु पदे अर्थे च खण्डशः शक्तिः त
थाच खण्डशक्तिस्थले कस्यचित् खण्डस्य भावः विशेषणविशेष्यभावस्य व्यासोऽपि कश्चिद्भवति एवं च आकृतौ हेत्वादौ उच्चपद —
स्य वहन कर्मादौ उच्चपदे खण्डशक्तेः सत्त्वेन उभयोपस्थितौ अर्थे कार्यस्य बाधात् तस्य विशेषणत्वे संभवति तत्त्यागे मानं नास्तीति
— अर्थवत् परिभाषा सिद्धेति वदन्ति तदेतदाह विशेषणतयान्वयसंभवे[illegible] इति स्यादेतत् अर्थस्य शब्दं प्रति वाचकता संबन्धेन
विशेषणत्वाङ्गीकारे प्रौढवानित्यादौ खड्गवारा वाचकतावच्छेदकानुपूर्वीसत्त्वे वाचकता नास्तीति वक्तुमशक्यत्वेन वाचकता —
संबन्धेन अर्थवदुच्चशब्दस्य सत्त्वात् न च स्वविषयकबोधजनकता संबन्धेन शब्दे [illegible] अर्थविशेषणत्वाङ्गीकारेण न दोष इति
वाच्यम् जनकताया स्वरूपयोग्यतारूपायाः ग्रहणे प्रौढवानित्यत्र खड्गवारेत्यत्र फलोपधायकताया ग्रहणे च यादृशानां
तोरपर्यन्तशक्ति[illegible] शाब्दबोधो न जातस्तादृश[illegible]भाव[illegible]प्रसङ्ग[illegible] इति चेन्नैवम्

२२ स्वविषयकबोधतात्पर्येणोच्चरितत्वसंबन्धेन शब्दं प्रत्यर्थस्य वैशेष्यस्वीकारेणादोषात् नन्वस्वविषयकबोधतात्पर्येणोच्चरितत्वस्योच्चार
णे ऊढपदं नोच्चरितमिति न तु मशब्दत्वेन तद्बोधकतादवस्थ्यमिति वाच्यम् स्वविषयकबोधजनकत्वप्रकारकतात्पर्यविशे-
ष्यतापर्याप्त्यधिकरणत्वसंबन्धेन शब्दं प्रति अर्थस्य विशेषणतास्वीकारेणादोषात् न चैवमपि प्रत्येकमपर्याप्तस्य समु
दाये पर्याप्त्यसंभवः समुदायस्य प्रत्येकानतिरेकादिति वाच्यम् वैयाकरणमते प्रत्येकापेक्षया समुदायस्यातिरिक्तत्वे
(स्य) नादोषात् अत एव समुदायशक्तिरूपत्वाभावे [illegible] इति निषेधाभावतोऽर्थसंज्ञेति कौमुदीग्रन्थः सङ्गच्छते अत एव समा
सग्रहस्य ~~…~~ नियमार्थसंभाव्यो न सङ्गच्छते अन्यथा राजन्‌ पुरुष इति प्रत्ययान्तत्वादित्वेन समुदायस्य
प्रत्ययान्ततादित्वेन तदसङ्गतिः स्पष्टैव अन्ये तु ऊढशब्दत्वपर्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगि
ताकपर्याप्तिकस्वविषयकबोधजनकत्वप्रकारकतात्पर्यविशेष्यतासंबन्धेन शब्दे अर्थस्य विशेषणत्वम् [illegible] व्यानि
त्यादौ ऊढशब्दत्वपर्याप्त्यनुयोगितावच्छेदकीभूतो धर्मस्त्रित्वं निरूक्तविशेष्यतापर्याप्त्यनुयोगितावच्छेदकं च [illegible] मिति
न दोषः न चैवमपि ऊढपदवत्तित्वविशिष्टनिरूक्तविशेष्यतापर्याप्त्यनुयोगितावच्छेदकं त्रित्वमेव गुणकर्मान्यत्वविशि-
ष्टसत्ताधिकरणत्वाभाववद्गुणकर्मणोः ऊढपदवत्तित्वविशिष्टनिरूक्तविशेष्यतापर्याप्त्यधिकरणत्वस्य ऊढत्वस्य देऽभा
वात् तथा च विशिष्टं शुद्धान्नातिरिच्यत इति न्यायेन केवलविशेष्यतायामपि ऊढशब्दत्वपर्याप्त्यनुयोगितावच्छेदक
धर्मावच्छिन्नानुयोगिताकपर्याप्तिकत्वस्य सत्त्वात् ओढ्यानित्यादौ व्याप्तिर्दुर्वारैवेति वाच्यम् ऊढपदवत्तित्ववि
शिष्टवानिति प्रतीत्या तदधिकरणत्वस्य निरूक्तविशेष्यतावानिति प्रतीत्या तदधिकरणत्वस्य च [illegible] त्वेन ताभ्या (कू)

ಶ್ರೀ ಗುರವೇ ನಮಃ॥ ಪಾಮಾನಸ ಸಂಮುಪ್ರನಿಕ್ಷೇಪಿಡುರೇ ಬ್ರಹ್ಮಾಶಿರಮಸ್ಪನಿಪ್ರ॥ ಸುರೇಶೋ ಶ್ರೀ ಯೋಗಿವರಾ ಪರಮಾತ್ಮನಿ ಸಕಲ ಕಲೇವರವ್ಯಾಪಿನಿ॥ ರಮಸ್ವ ಸಪದ್ಮಾಹು ಶ್ರೀ ... ಶ್ರೀ ...
ಆಭ್ಯ ಧ್ಯಾಯಾಮಿ ಮಮ ವನಾಂ ಶ್ರೀ ನಾಮಪಿ ಶ್ರೀ ... ಸಂಸಾರ ಪತನಂ ... ರಮಸ್ವ ॥ ಶ್ರೀ ಜಗ ... ಜ್ಞಾನ ... ॥ ಆಕಾಶ ವತ್ ... ದೈವತ ...
ಕ ... ॥ ರಮಸ್ವ । ಸಜ್ಜನ ಮನಸೌ ಭವಸಾಗರ ತರ ... ॥ ನರಾದಿಮಾಂ ... ರಜ ... ಲಕ್ಷ್ಮೀ ... ಪಾಲ ಗುರು ... ಪಯಾಂ ಸದಾ । ರಮಸ್ವ ... ॥

मेवोपपत्तौ उ(भय)पदवृत्तित्वविशिष्टनिरूपकविशेष्यताधिकरणत्वकल्पने प्रमाणाभावात् नचैवमपि अर्थविशेष्यकबो
धविषयत्वप्रकारकतात्पर्येणोच्चरिते वाक्यधर्मिकवाक्यार्थविषयकबोधजनकत्वप्रकारकतात्पर्येणोच्चरिते
वाक्यार्थविशेष्यकवाक्यजन्यबोधविषयत्वप्रकारकतात्पर्येणोच्चरिते च उभयत्र [illegible] अनापत्तिः बोध
जनकत्वप्रकारकतात्पर्यीयनिरूपकविशेष्यतासंबंधेन अर्थविशिष्टस्याभावादिति वाच्यम् स्ववृत्ति आनुपूर्वी
पर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्ति[illegible] स्वविषयकबोधजनकत्वप्रकारकता
त्पर्यविशेष्यताविशिष्टतात्पर्यविषयतासंबंधेन शब्दे अर्थस्य विशेषणतास्वीकारेणादोषात् स्वं च स्वसामाना
धिकरण्यम् स्वावच्छेदकधर्मसमानाधिकरणानुपूर्वीसमानाधिकरणः यत्रानुपूर्वीव्याप्यो धर्मः तदवच्छिन्न
एतदुभयसंबंधेन तथाच अर्थविशेष्यकेच्छीयजन्यत्वसंबंधावच्छिन्नप्रकारतायां वाक्यविशेष्यकेच्छीय
त्व, ...कतायां वाक्यार्थे विशेष्यकेच्छीयजन्यत्वसंबंधावच्छिन्नप्रकारतावच्छेदकतायां निरूपकविशेष्यता
विशेष्यतावच्छेदकतात्पर्यप्रतीत इच्छितत्वव्यापकानुपूर्वीव्याप्यधर्मावच्छिन्नत्वस्य सत्त्वान्न दोष इत्याहुः वर्णग्रहणेनेति। अ
वच्छेदकतनात्पर्यप्रतीत ...
संभवः यत्र आर्थरूपरवर्ण ... कार्यस्य बाधस्तत्रैव शाब्दे असमर्थस्य विशेषणत्वम् यत्र त्वर्थे कार्यमबाधितं तत्र तस्यैव विशेष्य
त्वम् तथाच अतङ्गे इत्यादौ वसुदेवापत्यरूपे अर्थे कार्यबाधेपि अवर्णरूपे द्वितीये ऽर्थे कार्यस्याबाधात् तस्यैव विशेष्यत्व

मिति नञ्शब्दं प्रति अर्थस्य विशेष्यत्वमिति विशिष्टरूपोपादानेति तत्त्वं च साक्षात्सम्बन्धसानुपूर्व्यावच्छिन्नप्रकारस्य विशेष्यताप्रयो
-जकम् अन्वयेति एवोऽन्वयार्थे ननु गोतोऽपि इत्यादौ गोशब्दस्य नानार्थत्वेन यावन्तोऽर्थास्तावदावृत्तिः कर्तव्या भवतीत्यभिमते
एवं लक्ष्यार्थस्य अनियतत्वेन यावल्लक्ष्यार्थास्तावदावृत्तिः सर्वत्र कर्तव्या भवति किंच केणः अणिमोरित्यादौ प्रसक्तस्य समभिव्याहा
रे प्रसक्तस्यार्थोपस्थापकत्वाभावेनानर्थकस्यापि कादिग्रहणापत्तिः तथा च शकेत्यादौ क्रस्यापत्तिरिति सूचयन्नाह किंचेति तथा च
स्वंरूपमिति प्रत्याख्यानमेकदेशिन इति भावः आत्मीयवाचिनेति ननु स्वप्यते बोध्यते इति स्वमर्थ इति कैयटोक्तं न किमर्थमु
स्थितमिति चेन्न यत्स्वं यदर्थविषयकबोधतात्पर्येणोच्चार्यते तस्य पदस्य सोऽर्थ आत्मीय इत्युच्यते तथा च कैयटोक्तव्या
ख्याने पूर्वोक्तता[blot]त्पर्यघटितसंबन्धेन शब्दं प्रत्यर्थस्य विशेषणत्वमिति सूचनं न भविष्यतीत्युपेक्षणात् अर्थ इति तथा चार्थत्वेन
वार्थस्य शब्दं प्रति विशेषणत्वमिति नातिप्रसङ्ग इति भावः — अमहान्महान्संपद्यते इति ननु च्विप्रत्ययार्थो ह्यारोपः नञर्थो
प्यारोपः तथा च न महान् अमहान् स चासौ ब्राह्मणश्चेति न अमहाब्राह्मण इत्यत्र आरोपं जायते महद्भूत इत्यादौ च न जायत इत्यत न
किं नैवमस्यमिति चेदत्रोच्यते अस्मन्मते सांख्ययोगानुसारिनिष्ठानमात्रं प्रति विषयस्य कारणत्वेन स्वप्न[blot]भ्रमाद्यनुरो
धेन बौद्धपदार्थकल्पना कर्तव्या तथा च बाह्यारो[blot] पञ्चम्यर्थे बौद्धारोपो न गर्थ इति वैषम्य[blot]स्वरूपपादत्वेन बाह्यारोपवि
शिष्टमहत्त्वविशिष्टस्यैव गौणत्वेनादोषात् पदकार्ये तत्रेति तत्त्वं च स्वीत्वा निमित्तकत्वे सति विमतत्वनिमित्तकत्वम् अतएव शङ्काचामह
न्तूवजातिरित्यत्र जातिग्रहणं अनर्थकं संपद्यते अमहान्महान्भवतीत्यादौ [blot] विग्रहवाक्ये त्यादेशादौ यादिकरणं संगच्छते अन्यथा शङ्का
त्यादौ गौणत्वादेव रापोऽप्राप्त्या जातिग्रहणवैयर्थ्यं [struck out] अनर्थकमित्यादौ गौणत्वादेवत्वाद्यादेशाप्राप्त्या (च) तत्करणासङ्गतिश्चेत्याह
एव

प्रत्यक्षप्रत्ययविषयस्य कारणत्वमिति योगिकाः

४८

[illegible]

[illegible]

[illegible]

[illegible]

न च भूरिमाचरति कुमावे त्यादौ निरुक्तपदकार्यत्वाभावेन एतन्यायाप्रवृत्तिरिति वाच्यम् स्त्रीत्वानिमित्तकत्वे सति प्रातिपदिक
प्रकृतिकप्रत्ययानिमित्तकत्वं पदकार्यत्वमिति परिष्कारेणादोषात् परंतु पदात्परत्वव्याप्यविषयताप्रयोजकपदघटितशास्त्रवि
धेयत्वं पदकार्यत्वम् सुबंतात्तद्धितोत्पत्तिरिति सिद्धान्तेन तद्धितनिष्ठविषयता पदात्परत्वव्याप्येति सर्वत्र लक्षणसमन्वयः
न चात्र तत्स्वार्थिकानां सुबुत्पत्तेः प्रागेवोत्पत्त्या आवादिभ्य कनि त्यादीनां निरुक्तपदकार्यत्वाभावेन यावसदृशार्थकयावशब्द
को नाप्नोतिरिति वाच्यम् यावकशब्दस्य यावसदृशेलक्षणायाः सर्वसंमतत्वेन यावसदृशार्थकयावकशब्दात्को [illegible] अपि बोधे
वेल [illegible] लक्षणाभावेन इष्टापत्तेः कर्तुं शक्यत्वात् न च कुमावेत्यादौ भवतेरद इत्याद्यापत्तिः उक्तपदकार्यत्वाभावादिति वाच्यम् इष्टापत्ते
रित्याहुः विशिष्यार्थोपस्थापकत्वाभावादिति सात्वादानुपूर्व्यवच्छिन्नमुख्यविशेष्यताप्रयोजकत्वरूपविशिष्टरूपोपादानत्वाभा
वादिति भावः ननु निपातपदं निपातपदघटत्वेनैवोपस्थापकमिति उक्तविशिष्टरूपोपादानत्वाभावः तथा च गोडमवदित्यादौ अनेनन्या
येन प्रगृह्यसंज्ञावारणपरभाष्यविरोध इति चेदाह चादित्वेनेति न च शक्यतावच्छेदकत्वादेर्नि[illegible]येन निपातपदस्य नानार्थता
पत्तिः तथा च यावंतश्चादयः तावदावृत्तिः ओदित्यादेः कर्तुं आमवति एवं च चिप्रत्ययानार्थमावर्तितो ओदित्सनमुख्यार्थक

५०

२५ त्वं तस्य सम्भवेन गोणमुख्यन्यायेन वारणपरभाष्यविरोध इति वाच्यम् निपातपदस्य चादिः आत इत्येतद्गतो यः समुदायः
तद्घटकजन्यबोधविषयतावच्छेदकावच्छिन्ने शक्तिस्वीकारेण शक्यतावच्छेदकचत्वादेर्नानात्वेऽपि शक्यतावच्छे
दकतावच्छेदकस्य बोधविषयतावच्छेदकत्वस्य चत्वादिनिष्ठस्यैक्येन नानार्थताविरहेण आवश्यकेनानुपयोगेन
माष्यविरोधाभावादिति दिक् ... त्वे इति आगोतोमूशसोरिति न्यासतात्पर्ये णेदं भाष्यं प्रवृत्तमित्याहुः —
— अर्थवताचानर्थकेन चेति अर्थवदनर्थकयोरर्थः तथाचार्थवत्पनर्थकानिश्चतद्गतविधिप्रयोजनीसर्थः अतिनरमन्नन्‌
८ गरस्नोयैः पदैस्तानीसर्थः अन्ये तु अनिनस्मन्नूषु वर्णग्रहणध्यम्भविच्छिन्नबोधकत्वमतिदिश्यतेऽनया परिमाषया तथाचैतद्धि
पयेलक्षणप्रतिपदोक्तनिरनुबन्धकप्रसयाप्रसयपरिभाषाणामप्रवृत्तिः सिद्धेत्याहुः भ्रमवारणायेति चिन्त्यमिदम् विभावेदं
स्त्रासम्भवेनानर्थकग्रहणेऽपि पूर्वसूत्रे तत्सम्भवेन तद्ग्रहणाभावे मानाभावात् अर्थवद्ग्रहणपरिभाषाया अप्रवृत्तौ मानाभावाच्च —
— तयाचाङ्गादित्यस्य एतदनित्यत्वसोपकत्वं सम्यगेवेति सुधियो विभावयन्तु — पस्नोतिरिति सूत्रे कैयट इति अनारुचिबीजन्तु
अलुगधिकारं प्रागानङः उत्तरपदाधिकारस्त्वापादपरिसमाप्तेरिति नियमानुपपत्तिः एकदेशे स्वरितत्वप्रतिसावकेऽत्यमिति
ननु अलुक्पदे उत्तरपदपदे च स्वरितत्वसत्वेन अलुकुत्तरपदमानङः प्राक् उत्तरपदमित्यन्त इति चाङ्गाधिकारात् प्राग् अनुवर्तितं इत्यत्र
किं नियामकमिति वाच्यम् तत्तदनुवृत्तिप्रयोजकस्वरितत्व ... विशेषस्यैव नियामकत्वात् एतदेव अनारङ्गानपी
त्यत्र मपर्यन्तानुवृत्तिसाधिकेति भाष्यं सङ्गच्छते अन्यथा अनुवृत्तेरर्थत्वे तदसावव्यवकल्प्येतेति परिभाषाज्ञापनं सम्भ
वतीति दिक् —

५०

इममिस्यादाविति नच प्रथमोपस्थितमिमाविति इमे इति च विहाय किमर्थं द्वितीयान्तपर्यन्तमनुधावनमिति वाच्यम् अनुनासिकस्य
ओकारस्याभावेन इमाविसप्तम्याः रूपसिद्धेः इमे इस्यत्र स्थानिनः उभयगुणकत्वेन कदाचिन्निरनुनासिकैकारे एवं इमे

[illegible]

इति लक्ष्यसिद्धेः भाव्यमानेनेति विधेयत्वं कर्मशानजर्थः न च विधेयताश्रयत्वं लक्ष्ये इति न तत्र सवर्णग्रहणप्रसङ्ग इति
वाच्यम् भाव्यमानपदे [illegible] विधेयताप्रयोजकलक्षणास्वीकारेणादोषात् न चैवमपि सदादीनामद्दसनेन निरनुनासिकाकार
विधानं स्यादिति वाच्यम् विधेयताप्रयोजकं स्वाश्रयवृत्तिधर्मवत्तांग्राहकं नेत्यर्थेनादोषात् न च स्वाश्रयवृत्तेः तद्व्यक्तित्वस्य
धर्मस्य निरनुनासिकेसत्वेन तद्दोषतादवस्थ्यमिति वाच्यम् तद्व्यक्तित्वातिरिक्तत्वेन धर्मे विशेषणेनादोषात् नचै
वमपि तद्व्यक्तित्वातिरिक्तस्य तत्तत्पुरुषीयत्वस्य स्वाश्रयवृत्ते धर्मस्य निरनुनासिके सत्वेन तद्दोषतादवस्थ्यमिति वाच्यम्
तत्पुरुषीयत्वातिरिक्तत्वेनापि विशेषणेनादोषात् न चैवमपि विधेयताप्रयोजकयणादिपदांशवृत्तेः तद्व्यक्तित्वतत्पुरुषी
यत्वातिरिक्तस्य निरनुनासिकत्वयत्वादेः इकोयणचीत्यत्र द्विधेयेसत्वेन तद्विधानानुपपत्तिरिति वाच्यम् स्वविशिष्टो
यस्तद्व्यक्तित्वतत्पुरुषीयत्वातिरिक्तो धर्मः तद्वत्तांग्राहकं नेत्यर्थेनादोषात् वैशिष्ट्यं च स्वाश्रयवृत्तित्व, स्वनिष्ठशक्तिनिरूपक-
तावच्छेदकसमुदायघटकत्वेति, एतदुभयसंबंधेन तथा च निरनुनासिकत्वादेः स्वाश्रयवृत्तित्वस्य सत्वेपि स्वनिष्ठाया
शक्तेः यकारादिवर्णानां समुदायघटकत्वावच्छिन्ननिरूपिताशक्तिः तन्निरूपकतावच्छेदकीयस्य समुदायस्य तद्घटक
वृत्तित्वस्याभावात्

बोध्यम्

५०

२६ अथवा स्वजन्यप्राथमिकोपस्थितिविषयाऽव्याप्तिर्यस्त द्व्यक्तित्वतद्रूपीयत्वातिरिक्तो धर्मस्तद्वत्तां ग्रहणं ने सर्थः नन्वेव
मपि बहुवचनेऽन्त्ये इदिसनेन च देऽभ्य इस्सादावुदात्तस्य सर्वेभ्य इस्सादावनुदात्तस्य च येभ्य इस्सादौ स्वरितस्य च विधानं स्यात्
उदात्तत्वादौ स्ववैशिष्ट्यादेस्सत्वादिति वाच्यम् स्वरभिन्नत्वेनापि धर्मे विशेषणदानेनादोषादिति दिक् अस्यां ज्ञापकमिति
न च ज्ञापिते पिज्यादर्यसइत्येव क्रियताम् न च अतो गुण इति पररूपे ज्यायानिति रूपासिद्धिरिति वाच्यम् लोपेनैवासिद्धेः अ
कारादेशविधानेन सवर्णदीर्घेण रूपसिद्धेः स्वांशे चारितार्थ्येनेति वाच्यम् दीर्घोच्चारणेन विधेयत्वेन तात्पर्यविषय
त्वस्य द्विमात्रिकेऽवधारणेन परिभाषाज्ञापनोत्तरं ह्रस्वोच्चारणे दीर्घविधानासम्भवेन पूर्वोक्ततात्पर्यविषयत्वोप
पत्त्यर्थं दीर्घोच्चारणस्य चारितार्थ्यात् ह्रस्वविधानेऽपि ज्यायानिति रूपसिद्धिर्भवतीति किं दीर्घोच्चारणेनेति पू
र्वपक्षानन्तरमेतत् प्रश्नस्य शब्दा इह शब्दो दीर्घाणि चिइष्ठ न इत्यावेन ज्यादेशे तस्मात् कर्तरि किपि ज्यायइति जाते त
स्मादीयसुनि ज्यायायानि इति सिध्यर्थं दीर्घोच्चारणस्य सार्थक्यादिति दिक्— तपरकरणमस्या ज्ञापकमिति यत्तु
दिवउदिति तपरकरणस्य स्वांशे चारितार्थ्याभावाद्द्वितीयं ज्ञापकमुपन्यस्तमिति तन्न दिविति प्राप्तिपदिकात्सप्तम्यां तदन्तात्क्विपि अदृशोपधलोप
-योरूठि च सूत्रस्य मिथ्यास्यते दीर्घस्यापि ह्रस्वादेशार्थं तपरकरणस्य स्वांशे चरितार्थत्वात् यदपि ऊदुपधाया गोह इति सूत्रस्य भाष्यविरु
द्धेयं परिभाषा तथाहि गोह इति विकृतनिर्देशप्रत्याख्यानाय ऊदिति प्रश्लेषकृतः यदीयं परिभाषा स्यात् ऊदुपधाया गु
ह इत्येव सिद्धे प्रश्लेषस्यानुयोगात् द्विरोधहति तदपि न ऊदुपधाया गुह इत्युच्यमाने तत्प्राप्तियोग्ये चारितार्थ्यविशिष्टं चारितार्थ्यं
चारितार्थ्यं तस्यात्र सत्तेन तत्र कौण्डिन्यन्यायेन गुणबाधापत्त्या गूहतीति रूपासिद्ध्या प्रश्लेषस्यावश्यकत्वात् परन्तु एतत्परिभाषा
याअभावेऽपि न क्षतिः अदसोऽसेर्दादु दो म इति समाहारद्वन्द्वेनैवोपपत्तेः न चापरनिमित्तकत्वेनान्तरङ्गत्वात् ह्रस्वे सवर्णदीर्घे च ऊ इति रूपा-

५२

[illegible]

सिद्धिरिति वाच्यम् अनारब्धपरिभाषायाअनित्यत्वेनोक्तरूपासिद्धेः अत एव सनाशंसभिक्ष उः (विच उम्) इत्यादौ न दोषः नच प्रत्ययमहासंज्ञया
दीर्घविधानं नस्यादिति वाच्यम् एवं सति भाष्यमानपरिभाषाया एव वैयर्थ्यापत्तेरित्याहुः — अवाद्यादेशापत्तेरिति नच अनारब्धानापि विधीनूव
क्रिरक्षोलुग्बाधत इति न्यायेन इत्संज्ञालोपाभ्यां प्रागेव लुकि गोहितामित्यादौ प्रत्ययलक्षणेपि न दोष इति वाच्यम् इको चीति सूत्रभाष्यप्रामाण्येन
~~[illegible]~~ लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानमिति वार्तिकप्रामाण्येन कि लुगुपधेति लुकि स्थानिवद्भावनिषेधेन अ
नारब्धानपीत्यत्र संज्ञाभिन्नत्वेन तस्य लोप इत्येतदतिरिक्तत्वेन संकोचेनादोषात् अन्यथा मधु सु इत्यत्र संबुद्धिसंज्ञायाः प्रागेवानेन न्यायाये
न लुकि गर्गाः बिदा इत्यादौ इत्संज्ञातः प्रागेव यञिञोश्चेति लुकि पंचैतः पञ्चो इत्यादौ इत्संज्ञालोपाभ्यां प्रागेव लुकं न स्यादिति तिलु
कि औत्सादेशत्वेन स्थानिवत्वाप्राप्त्या च तदसङ्गतिस्स्यात् नचैवमपि लुमता(ङ्ग)स्येति निषेधात्प्रत्ययलक्षणाप्राप्तिः नच लुप्तप्रत्ययनि
मित्ताकाङ्क्षपर्याप्तोद्देश्यताकत्वस्यावादेशे अभावेन न निषेधप्राप्तिः अत एवोत्कामेत्यादौ न निषेध इति वाच्यम् आनुमानिक
-स्थान्यादेशभावकल्पे अज व्यवहितपूर्वत्वविशिष्टो यस्यच तद्धटितं अयादिघटितंभवतीत्येचोयवायाव इत्यादीनां मध्ये न लुप्तप्र
त्ययनिमित्ताकाङ्क्षसंज्ञावत्पर्याप्तोद्देश्यताकत्वस्य अवादेशे सत्वेन प्रकृते निषेधप्रवृत्तेः सुकरत्वादिति वाच्यम् लुप्तप्रत्यया
व्यवहितपूर्वत्वेन साक्षादवच्छिन्ना लुप्तप्रत्ययनिमित्ताकाङ्क्षसंज्ञावत्पर्याप्तधर्मेण साक्षात्परंपरया अवच्छिन्नान्यया
उद्देश्यता तादृशोद्देश्यताकं कार्यं न भवतीति न लुमतेत्यस्यार्थकरणेनानुमानिकस्थान्यादेशभावीयोद्देश्यतायाः साक्षादुद्
लुप्तप्रत्ययाव्यवहितपूर्वत्वावच्छिन्न तस्य श्रौतस्थान्यादेशभावीयोद्देश्यताया साक्षात्परंपर

५·
२७

यायाः लुप्तप्रत्ययनिरूपिताङ्गसंज्ञावत्त्वपर्याप्तधर्मावच्छिन्नत्वस्य विरहेण प्रकृते उक्तामेस्यादौ चानवेधाप्रसक्तेः अत एव परमविप्रुअ इस्यादौ
न प्रत्ययलक्षणं अन्यथा उद्देश्यताया निर्दिश्यमानेत्येव सत्त्वेन लुप्तप्रत्ययनिमित्ताङ्गसंज्ञावत्त्वपर्याप्तोद्देश्यताकत्वस्याभावेन निषेधाप्र
वृत्त्या प्रत्ययलक्षणं दुर्वारं स्यादिति दिक् विशेष्यतारूपं चेति उभयानुगतवर्णप्राधान्यं च स्यावयवनिष्ठप्रकारतानिरूपितविशेष्यत्वा
प्रयोजकत्वम् तथा च ७।३।९२ ङ् हलोः तृणह इम् इस्यादौ स्यावयवनिष्ठप्रकारतानिरूपितविशेष्यत्वप्रयोजकत्वमेवेति मिचरशीरत्नो
डिस्यादौ न दोषः उणादयो व्युत्पन्नानीति उणाद्यन्तानां निप्रातिपदिकानि प्रकृतिप्रत्ययविभागज्ञानप्रयोज्यकार्याभाववत्त्वनी
त्यर्थः एतेन इदं वाक्यं मम माता वन्ध्येति वद्व्याहतमित्यपास्तम् धातुत्वाद्यापत्तिरिति तथा च देइस्यादेर्द्वित्वापत्तिः सुपो लुगापत्तिश्च न चास्तु
पोः स्येतिन्यासेन अङ्गावयवत्वाभावेन सुपो लुगभावः स्यादिति वाच्यम् देवदत्तश्चिकीर्षेत्यस्य धातुसत्तायां तस्मान्निवादो अङ्गावयवत्व
स्य सत्त्वात् अयञ्च इदमेव मात्वं मातमिति न च निष्कृष्यैकार्थीभावाभावेपि प्रत्ययस्वीकारे सूचनाडायनः राजपोलुगित्यत्र धापत्तिरिति वाच्यम्
एतद्भाष्यप्रामाण्येन प्रसत्त्वव्याप्यधर्मावच्छिन्नोद्देश्यताकप्रत्ययः निष्कृष्यैकार्थीभावाभावेपि भवतीति कल्पनेनादोषात् प्रत्ययमात्रग्रहणं इति
न च देवदत्तश्चिकीर्षतीत्यवतरणासङ्गतिः सन्नर्थप्रयोज्यविषयताया प्रत्ययेतरत्व प्रतीविषतीत्यत्राभ्यासोत्तरखण्डेपि सत्त्वात् अत एव तिङ्न्तशेखरे
अज्झनगमां सनि दीर्घमाशङ्क्य अभ्यासोत्तरखण्डे प्रत्ययत्वाभावेन अजन्ताङ्गाभावाद्दीर्घो न स्यादिति [illegible]मिति वाच्यम् तस्य शेखरस्यासङ्गतत्वेनादोषात् प्रती
गम
पिपतीत्यत्र दीर्घवारणाय हन्सहचर्येण सनघटकस्यैवाचो ग्रहणाद्दोषः एवम् अथवा प्रतिइ सस निवृत्तिरिति स्थिते अभ्यासविकारेष्वपवादस्यैव पूर्वं प्रवृ
त्त्या प्राप्तं ह्रस्वं बाधित्वा प्रतिपदविधित्वाद्दीर्घे ह्रस्वे इत्वे लक्ष्ये लक्षणन्यायेन दीर्घाप्रवृत्त्या तद्दृश्यसिद्धिर्बोध्या परन्तु प्रत्ययमात्रग्रहणं इस
स्य प्रत्ययमात्रवृत्तिविषयताप्रयोजकत्वमर्थः विषयतायां प्रत्ययमात्रवृत्तित्वं च प्रत्ययवृत्तित्वे सति प्रत्ययनिष्ठोद्देश्यतानिरूपितविधेयताप्रयुक्तप्र
त्ययेतरत्वावच्छिन्नम् तथा च तिङ्न्तशेखरः अवतरणं चेत्युभयमपि सङ्गतम् प्रतीविवतीत्यादौ अभ्यासोत्तरखण्डे प्रत्ययेतर

[illegible]

त्वस्यसत्वेपिप्रत्ययनिष्ठोद्देश्यतानिरूपितविधेयताश्रयैतरत्वस्याभावात् नचैवमपिरत्नादिपदस्यअनयापरिभाषयातदंततदादिपरत्वेतस्यानाशब्देन

वक्रुश्रीहोदेवदत्तास्थिरीर्घसस्यधातुत्वापत्त्यापुनरप्यवतरणमसङ्गतमितिवाच्यम् प्रत्ययग्रहणेतदादितदन्तस्यग्रहणंयथास्यानतथाकर्तव्यमिति-

परिभाषार्थेनादोषात् तथाचादग्धदहनन्यायेनयावानंशोऽसिद्धस्तावतएवोपस्थितिरितिसनाद्यंताइत्यादौतदादित्वधर्ममात्रोपस्थितिरिति

[illegible]

[illegible] अतएवयजिजोश्चेत्यादौयञन्तानांयञादितदन्तानांयत्प्रातिपदिकमित्यादिर्नार्थः अत

[illegible] न [illegible]षः अतएवमूलेविशेष्यान्तरासत्वेइत्युक्तम् शब्दस्यस्वरूपंविशेष्यमित्यस्य तदादिरूपंशब्दस्वरूपंविशेष्यमित्यर्थः नच

एवपरमओग्यायणइति एतत्परिभाषाफलमाचार्योक्तं सङ्गते [illegible] प्रातिपदिकमित्यादिरर्थोनस्याद्विशेष्यान्तरसत्वादितिवाच्यम् अनुत्तरपदस्थस्येतिज्ञापकेनक्वचि

यनोरच्चेत्यादौवर्णानांयञादितदन्तंयत्प्रातिपदिकमिति [illegible] उपस्थित्यादोषाभावात् प्रत्ययमात्रग्रहणेइत्युक्त्या उगितश्चेत्यादौनास्याःप्रवृत्तिरितिसर्वादि

द्विशेष्यान्तरसत्वेपितदा [illegible] दीति [illegible] ति शिवभागवतइत्यादौतुतद्धितसमासरहितोयुगपत्प्रत्ययः नाडायनः राजपौरुषिरित्यादौतुनयु

पतितमपत्तुइत्यस्मान्ङीपूर्व [illegible] ति कृत्तद्धितसमासाइत्यमियुक्तोत्याअनभिधानादित्याहुः — एतच्छरकेति तथाचतदादिविशेष्यक

गपद्धितद्वयप्रवृत्तिः अभिधानलक्षणाः अतएवकिमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षेबहुवचनस्यवस्नसौ तिङः तिङः इत्यादौतदादिविशेष्यकतदन्तविधि-

तदन्तविधिरेवारेनानिषिध्यतइतिभावः अतएवकिमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे एतेनकार्यान्तरविधानायेत्यस्यप्रत्ययातिरिक्तकार्यान्तरविधानायेत्यर्थः अतएवकिमेत्ति

निषेधेपिप्रातिपदिकपदावृत्तिविशेष्यत्वात्तदन्तविधिर्भवत्येव एतेनकार्यान्तरविधानायेत्यस्य प्रत्ययग्रहणंचापञ्चम्याः अनिषेधार्थकंभिन्नंपदं तथाचसाक्षात्परंपरया पञ्चम्यन्तार्थनिष्ठविषयतानि

ङव्ययइत्यादौतदन्तविधिरित्यपास्तम् प्रत्ययग्रहणंचापञ्चम्याः अनिषेधा[illegible]र्थकंभिन्नंपदं तथाचसाक्षात्परंपरयापञ्चम्यन्तार्थनिष्ठविषयतानि

रूपितविषयताप्रयोजकंयत्प्रत्ययमात्र [illegible] निविषयताप्रयोजकपदंतत्तदादिविशेष्यकतदन्तविधिप्रयोजकंनभवतीत्यर्थः धातुतकारस्य

ननत्वमिति स्यादेतत् रेफदकाराभ्यांपरीभूतायानिष्ठातदवयवस्यतकारस्यनकारादेशइत्यर्थेतीर्णयनोविद्यादौअन्त्यतकारस्यापिनत्वापत्तिः

नचआदेः परस्येतिपरिभाषयानदोषइतिवाच्यम् तग्रहणवैयर्थ्यापत्तेः नचचरितंकुरितमित्यादौइटोपिनत्वापत्तिरितिवाच्यम् निर्दिश्यमानप

-रिभाषयादोषवारणादितिचेन्नैवम् [illegible] धातोःक्तप्रत्ययेतस्मादाचारक्विन्तात्कर्तरिक्विपिदेवशब्देनसमासेतस्यपुनरन्यशब्देनसमासेदेवन्नदस्य

इत्यादौदकारस्यनत्ववारणायतग्रहणसार्थक्यात् नचैवंतदन्तविधावपिनिर्दिश्यमानपरिभाषयैवधातुतकारस्यनत्वंनभवतीतिवाच्यम् अनुज्ञाता

काराद्याचारक्विन्तान्तात्क्तप्रत्ययेएकाचइतिइण्निषेधेइवतन्नइत्यस्यइवन्तीर्णेसुर[illegible]पत्तेःक्षणात्वेनफलसत्वात् नतदन्तविधिरिति नचतस्मान्निति पुरि

भावयाऽव्यवहितपूर्वत्वस्यैवोपस्थितिः स्यात् लुकोः परयो [illegible] आसक्ति [illegible] वाच्यम् सप्तम्यनार्थे पदिकं कार्यं अव्यवहितपूर्वस्य यथा स्यात् तथा कर्तव्यमिति तस्मिन्निति परिभाषार्थस्वीकारेण लुकोरव्यवहितपरयोरित्यर्थेऽपि अव्यवहितपूर्वस्य कार्यबोधनेन प्रकृतार्थसङ्गतेः अत एव तत्र तत्र अचि परे इत्यादि भाष्यं सङ्गच्छते न च प्रत्ययस्य निमित्तत्वेन यत्रोपादानं तत्र तदादेरित्यंशोपस्थितेः फलाभाव इति वाच्यम् हे दे पदत्र अम् हेमानौ आनू इत्यादौ अभिपूर्वः औतो मशसोरित्याप्रवृत्त्यर्थे तदादेरित्यंशोपस्थितेरावश्यकत्वात् वस्तुतस्तु अवयवे रोनिर्हसंवा क्षेत्रं रूपं तद्रूपनिष्ठविषयतानिरूपिताया प्रत्ययमात्रवृत्तिविषयतात्तत्प्रयोजकं पदं तदादिविशेष्यकतदन्तविधिप्रयोजकं न भवतीति परिभाषार्थ इति अव्यवहितपूर्वत्वोपस्थितावपि न तदादिविशेष्यकतदन्तविधिः हल्ङ्याब्भ्य इत्यादौ तु सुतिसीत्युपस्थापित तदादिविशेष्यकतदन्तविधिर्भवतीति न दोषः यत्तु एङ्ह्रस्वादित्यादौ तदादिविशेष्यकतदन्तविधिर्भवतीति अङ्गाक्षेपो न कर्तव्य इति तन्न कतरदित्यादौ लोपस्य दुर्वारत्वात् न च एङः साहचर्यात् संबुद्ध्यन्तवयवस्य ह्रस्वो ग्राह्यत इति न दोष इति वाच्यम् तदादेरित्यस्योपस्थितेः फलाभावप्रसङ्गादिति दिक् — कुमारी ब्राह्मणरूपेति न च पुंवत्कर्मेति पुंवद्भावे कुमारब्राह्मणिरूपेति स्यादिति वाच्यम् कुमारी ब्राह्मणि रूपा इति स्थिते पुंवद्भावेऽपि त्वोपरत्वाद्ध्रस्वः स्यादिति योजनेनादोषात् यद्वा बहुव्रीहिसमासस्वीकारेण वयोवाचकानां वैकल्पिक जातिवाचकत्वस्य जातेरिति सूत्रे भाष्ये उक्तत्वेन जातेश्चेति पुंवद्भावनिषेधाच्च यत्तु कुमारी ब्राह्मणी ब्राह्मणीरूपेति वर्षीतत्पुरुष इति तन्न घरूपेति सूत्रे समानाधिकरण इत्यनुवृत्तेः अत एव घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः न घास्तरा नदीतरा न वक्तव्यः समानाधिकरणे तद्धि ज्ञायते एवं तर्हि यानदीसेवतरेत्यादि भाष्यं सङ्गच्छते लेखग्रहणमेवेति न च हृत्परमलेख इत्यादौ हृदादेशार्थं लेखग्रहणं सार्थकमिति वाच्यम् अनुत्तरपदस्येति ज्ञापकेन क्वचिद्विशेष्यान्तरसत्वेऽपि तदादीति धर्मिण उपस्थितिसाऽखनां यत्तदादि तदन्तं यदुत्तरपदं तस्मिन्परत इत्यादिक्रमेणार्थेन कि अणग्रहणेनैव निरूपक रूपसिद्धेः किंच यत्र प्रत्ययस्य निमित्तत्वेनोपादानं तत्र तदादेरित्यस्य पंचम्यन्तत्वस्वीकारेण तदादेः परीभूतो योऽणू तदन्ते उत्तरपदे इत्यर्थेन हृत्परमलेख इति रूपसिद्धेश्च किंच गिलगिले चेति ज्ञापकेन उत्तरपदाधिकारे सप्तम्यन्त प्रातिपदिकग्रहणेन तदन्तग्रहणमिति बलवत्त्वेन हृत्परमलेख इति प्रयोगाभावाच्च न चैवमपि रात्रेः कृतीत्यादौ तदन्तग्रहणं न स्यात् न च रात्रिशब्दात्केवलकृत्परत्वासम्भवेन तदन्तविधिः स्यादिति वाच्यम् रात्रिशब्दाद्दाचारक्विबन्तात् व्यदादौ केवलकृत्परत्वसंभवादिति वाच्यम् प्रत्ययस्यानुपूर्व्यवच्छिन्नाया प्रत्ययमात्रवृत्तिविषयता तादृशी

विषयताप्रयोजकं ▬ उत्तरपदविशेष्यकतदंतविधिप्रयोजकंनेत्यर्थकरणेनादोषात् अन्येतु गिलगिले च अपग्रहणेन चस्य सानुपूर्व्यवच्छिन्नविषयता
प्रयोजकंस ▬ सप्तम्यन्तं उत्तरपदविशेष्यकतदन्तविधिप्रयोजकंनेत्यर्थिकां उत्तरपदाधिकारे सप्तम्यंतग्रहणेन तदंतग्रहणमिति परिभाषामङ्गीकुर्वन्ति —
येतन्मते उपसर्गस्य घञी स्यादौ तदन्तविधिर्न स्यादिति वाच्यम् केवलघञ्परत्वासम्भवेनैव तदन्तविधिलाभात् नच अशब्दादाचारक्विबन्ताद्भूमि

[illegible]

[illegible]

[illegible] उपसर्गस्य घञीति सप्तम्यर्थसाम र्थ्यगेव

— अतो लोपे परि अ इत्यत्र केवलघञ्परत्वसंभव इति वाच्यम् दीर्घस्य ह्रस्वस्य वा यणि विशेषाभावेन उपसर्गस्य घञीति सप्तम्यर्थसाम तदन्त —
तदंतविधिलाभात् परेतु निरुक्तज्ञापकाभ्यां पदविशेष्यकस्तदन्तविधिर्नेति कल्प्यते अतएव तुंदशोकयोरित्यादावुपपदविशेष्यकस्तदन्त विधिः सिद्धः
विधिर्न अतएव च दिग्धपादोपहत इत्यादौ पदादेशेन इयं चानित्या तेन पदस्येधिकारे दृष्टकेपीकेत्यादौ मयशब्दादौ च तदन्तविधिः नतु विशेष्याणानन्तत्वेन तदा
क्तातदंतविधिः इत्यनेन सन्नतुल्यक्ष्यानुसारिव्याख्यानमेव शरणमित्याहुः — परमकारीषगंधीपुत्र इत्यत्रेवेति न तु उत्तरपदयोरिति ष्यङः
ष्यङः पदमन्मात्रस्येवोपस्थित्या ष्यङन्तं ष्यङः समाधिहितः तदादिविशिष्टं पूर्वपदं तस्य संप्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोरिति स्था
— संप्रसारणमित्यस्यार्थेन प्रकृते संप्रसारणाप्राप्त्या दृष्टान्तदानमनुचितम् नचानुत्तरपदस्येति ज्ञापकात् विकल्पमिणउपस्थितस्या अतिकारीष
ष्यङन्तं यत्तदादि तदन्तं यत्पूर्वपदमित्यादिक्रमेणार्थेन दृष्टान्तासङ्गतिरिति वाच्यम् परिभाषास्वीकारेपि अतिकारीष
— गन्ध्यापुत्र इत्यत्र संप्रसारणं स्यादुक्तरीत्यादिति चेन्नैवम् इवशब्दो भिन्नक्रमः अतिकारीषगन्ध्यापुत्र इत्यत्रेव परमकारीष
गन्ध्यापुत्र इत्य▬त्रापि संप्रसारणं स्यादिति तदर्थः मरुवृधं शीनरेपु जलं पित्रवत्पिण्डितइति वेद्यं साम्येण दृष्टान्तमेतत्
स्वप्रतियोगिकाभाववत्त्वसंबन्धेन तत्रेवात्रापि संप्रसारणमिति यन्न्यसङ्गतेः स्त्रीप्रत्यये चानुपसर्जनेन ननु यच्चानुप
सर्जनस्त्रीप्रत्ययः तत्र तदादिनियमप्राप्तिः स्त्रीप्रत्ययस्यानुपसर्जनत्वात् यत्र तदादिनियमप्राप्तिस्तत्र नानुपसर्जनस्त्रीप्र
त्यय इति चेन्नैवम् ग्रहणमात्रे उपतिष्ठत इति शेषः तथा च स्त्रीप्रत्ययेग्रहणमात्रे अनुपसर्जनस्योपतिष्ठते तदादिनियम इत्यनेन सर्थेनाऽ
भात् ।।

१०

एतत्परिभाषाविषये वाक्यद्वयम् तथा च उपसर्जनो यः ष्यङ् तदन्तं ष्यङ् यस्माद्विहितस्तत्तदादित्वविशिष्टं तस्येत्यादिक्रमेणैको वाक्यार्थः
अनुपसर्जनो यः ष्यङ् तदन्तं यत्पूर्वपदं मित्यादिक्रमेण द्वितीयो वाक्यार्थः अत्राद्योदाहरणं कारीषगन्ध्यानमनुष्यः कारीषगन्ध्या। तस्याः पुत्रः
कारीषगन्धीपुत्र इति द्वितीयोदाहरणं परमकारीषगन्धीपुत्र इति अतिकारीषगन्ध्यापुत्र इत्यत्र न सम्प्रसारणं ष्यङन्ततदादित्वस्याभावेन पूर्व
वाक्यस्य ष्यङ् उपसर्जनत्वेनोत्तरवाक्यस्य चाप्रवृत्तेः अत्रोपसर्जनत्वं च स्वान्तपर्याप्तशक्तिनिरूपकार्थनिष्ठविशेष्यतानिरूपितस्वी
यत्वनिष्ठप्रकारतावच्छेदकताप्रयोजकत्वम् स्वान्तमति कारीषगन्ध्येति तत्पर्याप्तशक्तिनिरूपको योऽर्थः क्रमेण तन्निष्ठविशेष्यतानिरूपित
प्रकारता कारीषगन्ध्यायां तदवच्छेदकता स्त्रीत्वे तत्प्रयोजकत्वं ष्यङ इति लक्षणसमन्वयः नन्व बहुश्रेयसीत्यादौ ङीप उपसर्जनत्वेन
ङ्यन्ततदादित्वस्य विशिष्टे अभावेन हल्ङ्यादिलोपानापत्तिरिति वाच्यम् सुतिसिभिः तदादीसु पस्थापनीयं वाङ्याभ्यां तदादीसु
पस्थापनीयमिति च विनिगमनाविरहेण उभाभ्यामपि तदादीति धर्मिणो रूपस्थितत्वात् एवं तं यत्तदादि तदन्तं यत्तदादीति तदन्तविधि
द्वयेनादोषात् अथवा स्वान्ततदाद्यवधिकपूर्वत्वपर्याप्तप्रयोजकतानिरूपितप्रयोज्यताविशिष्टविशेष्यतानिरूपितायाः स्वी
यत्वनिष्ठप्रकारतावच्छेदकता तत्प्रयोजकत्वमुपसर्जनत्वम् एवं च बहुश्रेयसीत्यादौ अन्यपदार्थनिष्ठविशेष्यतायां बहुपदप
र्याप्तप्रयोजकतानिरूपितप्रयोज्यतावत्त्वस्याभावेन ङीपो निरुक्तमुपसर्जनत्वं नास्तीति न दोषः अस्मिन्कल्पे तत्र तत्रारनिरविनकर्त
व्या ... नूलुवना कारीषगन्ध्याशब्दस्य पुत्रशब्देन समासे निरुक्तोपसर्जनत्वस्याभावेनानुपसर्जनवाक्येनैव सम्प्रसारणसिद्धेः
नन्वेकान्तलुवना कारीषगन्ध्याशब्दस्य परमशब्देन समासे पुनः पुत्रशब्देन समासेऽस्मिन्कल्पे परमकारीषगन्धीपुत्र इति पूर्वकल्पे
परमकारीषगन्ध्यापुत्र इति फलभेदः स्यादिति वाच्यम् उपसर्जनत्वपरिष्कारभेदेन फलभेदस्येष्टत्वात् अथवा लक्ष्ये एवेयं
परिभाषा उपतिष्ठत इतिमत्वाह तत्र तदादिनियमो नेति व्यावर्तकोनेत्यर्थः तथा च यस्मिन् लक्ष्ये स्त्रीप्रत्ययोऽनुपसर्जनः
तत्र अतदादावपि तदादित्वमारोप्यते तथा च परमकारीषगन्धीपुत्र इत्यादौ परमकारीषगन्ध्येत्यत्र ष्यङन्ततदादित्वस्या
रोपेण सम्प्रसारणं सिद्धम् अतिकारीषगन्ध्यापुत्र इत्यादौ तु ष्यङ उपसर्जनत्वेन अतदादौ तदादित्वारोपाभावान्न संप्रसारणं
अस्मिन्कल्पे च यथेष्टं पूर्वोक्तमुपसर्जनत्वं ग्राह्यमिति दिक्

प्रत्ययस्येति यस्य स्त्रीप्रत्ययान्तत्वादिसंबन्धित्वं तत्पर्याप्तशक्तिनिरूपके सा घाप्लक्षणं परिष्करणीयम् एवं यस्य स्त्रीप्रत्ययान्तत्वादि
संबन्धित्वं तद्घटकस्यान्तत्वाद्यवच्छिन्नपूर्वत्ववत्पदे सा द्वितीयं लक्षणं परिष्करणीयमिति भावः असंभवादिति न च यां
निष्क्रान्तो निरियित्यादौ केवलस्त्रीप्रत्ययस्य शास्त्रीयोपसर्जनत्वसंभव इति वाच्यम् फलाभावात् न च अस्मात् स्त्रीभ्यो ढगिति
ढगभावः फलमिति वाच्यम् अनेन ढगभावेऽपि इतश्चानिञ इति ढकि फलाभावात् परं तु अस्यां परिभाषायां लौकिकोपसर्जन
-त्वसमानाधिकरणं शास्त्रीयोपसर्जनत्वं गृह्यते अत एव एकदेशिसमासप्रकरण प्रत्याख्यानपरभाष्यं सङ्गच्छते अन्यथा अर्ध
कारीषगन्धीपुत्र इत्यादौ आरम्भपक्षे संप्रसारणं न प्राप्नोति प्रत्याख्याने प्राप्नोतीति फलभेदेन तदसङ्गतिः स्यात् एवं ममतु लौ
किकोपसर्जनत्वसत्त्वेऽपि एकविभक्तावषष्ठ्यन्तवचनम् एकदेशिसमासविषयकोऽयं निषेध इति न फलभेदः अथवा शास्त्रीयमेवोप
सर्जनत्वं गृह्यताम् न च उपसर्जनत्वपरिष्कारघटकप्रकारतायां निरूप्यनिरूपकभावसंबन्धावच्छिन्नत्वं विशेषणं दीयत इति लौकि
कोपसर्जनत्वस्वीकारेऽपि नारंभप्रत्याख्यानयोः फलभेदः अर्धकारीषगन्धीपुत्र इत्यादौ कारीषगन्ध्यानिष्ठप्रकारतायां निरूप्य त्व
निरूपकभावसंबन्धावच्छिन्नत्वादिति वाच्यम् गोवक्रयणीशब्दात् स्त्रीभ्यो ढगिति ढगनापत्तेः मम तु लौकिकोपसर्जनत्वसमाना
धिकरण शास्त्रीयोपसर्जनत्वस्य केवलशास्त्रीयोपसर्जनत्वस्य वा व्यापकत्वाभावेन न दोषः न च अतिकारीषगन्ध्यापुत्र इत्यादौ
शास्त्रीयोपसर्जनत्वं कारीषगन्ध्यापदे लौकिकमुपसर्जनत्वं च्यङ् इति लौकिकोपसर्जनत्वसमानाधिकरणं शास्त्रीयोपसर्जनत्वं ग्र
हीतुमेव न शक्यत इति वाच्यम् स्वांतपर्याप्तशक्तिनिरूपकार्थनिष्ठविशेष्यतानिरूपितस्त्रीत्वावच्छिन्नप्रकारताप्रयोजकत्वं स्वा
न्ततदाद्यवच्छिन्नपूर्वत्ववत्पदपर्याप्तप्रयोजकतानिरूपितप्रयोज्यतावद्विशेष्यतानिरूपितस्त्रीत्वावच्छिन्नप्रकारताप्रयोजक
त्वं वा लौकिकमुपसर्जनत्वमिति परिष्कारेणादोषात् शास्त्रीयोपसर्जनत्वस्वीकारादेव अतिगोवक्रयणिरित्यादौ ह्रस्वसिद्धिः
यस्य स्त्रीप्रत्ययान्तत्वमाने यं तत्पर्याप्तसमासनिरूपितशास्त्रीयोपसर्जनत्वग्रहणात् तत्र गोवक्रयणीप्रतिवक्रयण्या उपसर्जनत्वेन
ह्रस्वो न स्यादित्याहुः

स्त्रीप्रत्ययमात्रग्रहणे इति अत एव समासग्रहणं नियमार्थत्वं भाष्योक्तं संगच्छते अन्यथा परमकुमारीत्यादौ अप्रत्यय इति पर्युदासेन
समासग्रहणं विध्यर्थमेव स्यात् अत एव राजकुमारी परमकारिमित्यादौ च प्रसित्यादिरिति आपुदाहृतं रेफाकारपकारशकारयोर्न
वाचनि कथं वेति भाष्ये वचनरूपेण पठितेत्यर्थः अत्र च सापर्क यस्मा
त्प्रत्ययविधिस्तदादीति विमतसूत्रे नेयङुवङ्स्थानावस्त्री इति मण्डूकप्लुत्या अनुवर्तते शब्दाधिकारश्चाश्रीयते तथा च प्रधानाप्र
धानयोरिति न्यायेन प्राधान्येन स्त्रीत्वबोधकप्रत्ययातिरिक्ते प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादी सुप्रतिष्ठते तेन नेयं परिभाषा
सिद्धेति दिक् — संज्ञाविधौ संज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकं यत्प्रत्ययमात्रवृत्तिविषयताप्रयोजकं तत्
तदादिविशेष्यकतदन्तविधिप्रयोजकं नेत्यर्थः अत्र साक्षादिति विशेषेण अर्थवत्सूत्रे प्रत्ययांशे तदादिविशेष्यकतदन्तविधिः सिद्धः तदादिवि
शेष्यकेष्टत्वात् कृत्तद्धितसमासाश्चेति सूत्रे अर्थवद्विशेष्यकतदन्तविधिः सिद्धः अत एव कृत्तद्धित इति सूत्रे अग्रहणं कर्तव्यम् न कर्तव्यम् अर्थ
वदिति वर्तते कृत्तद्धितान्तं चैवार्थवदिति भाष्यं संगच्छते भाष्ये अर्थवदिसनंतरं प्रातिपदिकमिति शेषो बोध्यः केचित्तु इयं परिभाषा न कर्त
व्या तरप्तमपौ घ इत्यादौ परौ तमप्तरपौ घ इति न्यासे नैव तदन्तविधिनिषेधसिद्धेः परत्वस्य बध्यंशे नित्यसाकांक्षत्वात् पञ्चम्यन्तप्रातिपदिका
दित्यस्यान्वयेन प्रत्ययग्रहणं चापं चम्या इति निषेधप्रवृत्तेः सुपपादत्वात् न च तमतरवतुनिष्ठे तदन्तविधिः स्यादिति वाच्यम् तमवतु
पदे प्रत्यय इति वि विषयताप्रयोजकत्वस्यैवाभावेन तमपदे प्रत्यय इति विषयताप्रयोजकसत्त्वेपि प्रत्ययमात्रवृत्तिविषयताप्रयो
जकत्वस्यैवाभावेन प्रत्ययग्रहणपरिभाषाया अप्रवृत्तेः न च इदूदेद्द्विवचनं मित्यादौ तदन्तविधिः स्यादिति वाच्यम् श्रुतानुमितयोः श्रुतसं
बन्धो बलीयानिति परिभाषया इदूदेदित्यस्य द्विवचनेनान्वयेन तदन्तविध्यप्रसक्तेः समभावात् न च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशे
नेति व्युत्पत्त्या द्विवचनान्त तदार्थैकदेशद्विवचने इदूदेदित्यस्यान्वयो न स्यादिति वाच्यम् गम्भीरायां नद्यां घोषः स्यन्द न [illegible] गम्भी

रनदीतीरे त्वाक्षपिकं गम्भीरपदं तात्पर्यग्राहकमिति वत् ङमो ह्रस्वादचीत्यादौ ङम् पदं ह्रस्वा व्यवहितोत्तरत्वविशिष्टो योऽच् तदन्तोत्क्षि
पिकं स्यादिति तात्पर्यग्राहकमिति वच्च द्विवचनपदं ईदूदेदन्तं यद्द्विवचनं तदन्तं तदा द्वैतात्क्षिपिकं ईदूदेदिति तात्पर्यग्राहकमित्यादौ
प्रात् न च ल इति तिङ् तिङ्शित्सार्वधातुकं आर्द्धधातुकं शेषः लिट् च लिङाशिषि छन्दस्युभयथा तेन तत्र आर्द्धधातुकसंज्ञाः इत्या
दौ तदन्तविधिः स्यादिति वाच्यम् तृतीयाध्याये धातोरित्यधिकारे ङ्याप्प्रातिपदिकादित्यधिकारे च प्रत्ययग्रहणं चा
पञ्चम्या इति परिभाषयैव तदन्तविधिनिषेधसिद्धेः न च एकवचनं संबुद्धिः लः परस्मैपदं तङानावात्मनेपदम् तिङस्त्रीणि त्री
णि तान्येकवचन सुपः विभक्तिश्च इत्यादौ तदन्तविधिः स्यादिति वाच्यम् ह्रस्वस्य गुण इत्यादीनामङ्गाधिकारे पाठेनादेशसंज्ञा
पुरस्कारेण अङ्गाधिकारे प्रत्ययस्य निमित्तत्वं तत्संज्ञाशास्त्रे तदादिविशेष्यकतदन्तविधिर्नेति ज्ञापनेनादोषात् अतएव प्रथम
चरमतयविभाषामकरणोतीयस्य ङित्सूपसङ्ख्यानं कृत्तद्धित अर्थवदधातुरप्रत्ययः तद्धितश्चासर्वविभक्तिः कृन्मेजन्तः क्त्वा
तोसुन्कसुनः सामन्त्रितमित्यादौ तदन्तविधिः सिद्धः यत्तु यः प्रत्ययस्य इत्यादौ प्रत्ययग्रहणपरिभाषया तदन्तविधिः स्यादिति तन्न
प्रत्ययबोधकबोधकत्वेपि प्रत्ययबोधकत्वाभावेन प्रत्ययग्रहणपरिभाषाया अप्रवृत्तेरित्याहुः ~~कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं~~
कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं यथा ... गतिकारकपूर्वपदके ... धर्मोपाधिकेनानातत्वादित्वमारोपणीय
मिति भावः अपि नाकेवलस्यापि ग्रहणं न च संकुचितं न च रूढित्वाद्व्यपि अभिनुपाहत्य णाभाक्तिरिति वाच्यम् रूढस्य चलनन्यायेन विशिष्टा
देवापि आपत्समावात् तावन्मात्रे एकार्थीभावाभावाच्च अतएव राजपोरुषिः ~~...~~ सूत्रनाङ्गायत इत्यादिन भवति स्वरार्थमिति अस्मु
ष्टितमित्यत्र समासस्येत्यन्तोदात्तत्वं बाधित्वा तत्पुरुषे तुल्यार्थे ~~...~~ ति पूर्वपदप्रकृतिस्वरप्राप्तौ तं बाधित्वा
गतिकारकोपपदादिति कृदुत्तरपदप्रकृतिस्वरप्राप्तौ तं बाधित्वा अव्ययपूर्वपदम् अपूर्वक इत्येवमन्तानामुत्तरपदानां गतिकारकोपपदात्
रबाभात्उदात्तस्यादित्येतदर्थकमापि ... पञ्चाजपिकाणामित्यन्तोदात्तत्वे प्राप्ते ~~...~~ ज्ञापनार्थं गतिरनन्तर इत्यत्रानन्तरग्रहणमाव
श्यकमिति भावः

५.

३१ उदुदात्तत्वसिद्धेरिति नन्वविशेषकानांतरसत्वे तदादित्वधर्ममात्रस्यैवोपपत्तिः सा गतिकारकोपपदात्कृदिति उत्तरस्मात्कृतः तदादित्वविशिष्टं उत्तर
पदं प्रकृत्येति गतिकारकोपपदादिसंसर्गेनामुक्त इत्यादौ उदात्तस्य उदात्ततदादित्वाभावात् अनुदात्तस्वरसिद्धिः अनुत्तरपदस्यसे
तिसार्थकेन [illegible] कचिद्विशेष्यानांतरसत्वेपि कचित्तदादीति धर्मोपस्थितिरुदात्तत्वं तदादितदंतं यदुत्तरपदं तत्प्रकृत्यैत्वर्थेन उदुदा
त्तत्वसिद्धेः अथवा गतिरनंतर इत्यत्र गतिश्चेति पठ्यते चः पुनर्विध्यर्थः इदं चापूर्वपदत्वेपि स्वरार्थमिति उदुदात्तत्वसिद्धेश्च
तदसमभिव्याहार इति चिन्त्यमिदम् नस्यनिभिन्न इत्यादौ समासानापत्तेः [illegible] कदाचित्तन्नो व्यणिति एतद्दूषणोद्धारे
पूर्वमेवायोच्याम कन्मात्रग्रहण इति अत एव [illegible] मित्यादि निसमित्यादिदानां प्रयास इत्यादौ उपसर्गकारस्मानेति दिक्
ननु दकारग्रहणमिति तेन दग्धपादो यहतद्द इत्यादौ पादस्य पदाज्यातीति पदादेशो न = व्यपदेशिवत् अत्रेदं तत्त्वम् स्वघटकाव्यवहितपूर्व
त्व, स्वघटकाव्यवहितोत्तरत्वाभाववत्त्व, स्वघटकत्व, एतत्त्रितयसंबंधेन स्वविशिष्टत्वमादित्वम् एवं स्वघटकाव्यवहितोत्तरत्व, स्वघटकाव्यवहितपूर्व
त्वाभाववत्त्व, स्वघटकत्व, एतत्त्रितयसंबंधेन स्वविशिष्टत्वम् अन्तत्वमिति सूत्रकृदभिप्रैति अत एव आद्यन्तवदेकस्मिन्निति सूत्रयामास अपूर्वानुत्तरलक्षण
त्वादाद्यन्तयोः सिद्धमिति वदन् वार्तिककारस्तु स्वघटकाव्यवहितोत्तरत्वाभाववत्त्व, स्वघटकत्व, एतदुभयसंबंधेन स्वविशिष्टत्वमादित्वम् स्वघटकाव्यव
हितपूर्वत्वाभाववत्त्व स्वघटकत्व एतदुभयसंबंधेन स्वविशिष्टत्वमन्तत्वमित्यभिप्रैति धुनित्यादिलक्ष्यानि आद्यन्तवदेकस्मिन्निति सूत्रं अति
देशं विना स्वस्मिन् स्वादित्वादिकं नायातीति अपूर्वानुत्तरलक्षणत्वादिति वार्तिकं च प्रत्याचख्यौ भाष्यकारस्तु स्वघटकत्व, स्वघटकवर्णध्वंसानधिकरणक्षण
वृत्त्युत्पत्तिकत्व, एतदुभयसंबंधेन स्वविशिष्टत्वमादित्वम् एवं स्वघटकत्व, स्वघटकवर्णप्रागभावानधिकरणक्षणवृत्त्युत्पत्तिकत्व, एतदुभयसंबंधेन स्ववि
शिष्टत्वमन्तत्वम् अत्र घटकत्वं च स्वनिष्ठविषयित्वसंबंधावच्छिन्नव्याप्यतानिरूपितविषयित्वसंबंधावच्छिन्नव्यापकतावत्त्व, स्वनिष्ठविषयित्वसंबंधाव
च्छिन्नव्यापकतानिरूपितविषयित्वसंबंधावच्छिन्नव्याप्यताभाववत्त्व, एतदुभयसंबंधेन स्वविशिष्टत्वम् एवं घटितत्वमपि स्वनिष्ठविषयित्वसंबं
धावच्छिन्नव्यापकतानिरूपितविषयित्वसंबंधावच्छिन्नव्याप्यतावत्त्व, स्वनिष्ठविषयित्वसंबंधावच्छिन्नव्याप्यतानिरूपितविषयित्वसंबंधावच्छिन्न
व्यापकत्वाभाववत्त्व, एतदुभयसंबंधेन तथा च स्वस्मिन् स्वघटकत्वं स्वघटितत्वं नास्तीति व्यपदेशिवदेकस्मिन्नित्यारम्भ्यमित्यभिप्रैति

परिभाषार्थस्तु एकस्मिन् एकसंबंधविशिष्टे व्यपदेशिवत् मुख्यव्यवहारवान् संबंधद्वयसत्वात् तेन तुल्यं वर्तत इत्यर्थः एकसंबंधविशिष्टेपि संबंधद्वयविशिष्टे
व कार्यं कर्तव्यमिति यावत् तथा च घटकत्वघटितत्वशरीराणां पार्थक्येकसंबंधसत्वेपि संबंधद्वयविशिष्टवत्कार्यं भवतीति लाभेन अनया परिभाषया घटकत्व
घटितत्वमेव चातिदिश्यते नान्यो धर्म इति दिक् एकस्मिन्निति सुकेरिति मुख्यधर्मवदघटितत्वे सति मुख्यधर्मवद्घटकत्वे सति मुख्यधर्मवद्समभिव्या
हृतत्वम् [struck] असहायत्वम् अत्र प्रथमसत्वनादानेन समासं नयनशब्दे च ख त्वस्य दरिद्राधातो इवर्णान्तस्य नातिदेशः
द्वितीयसत्वनादानेन च मासं नयने प्रातिपदिकत्वस्य दरीस [illegible] धातुत्वस्य च नातिदेशः तृतीयदलेन च आकारे समासं नयनानिरूपितादित्वस्य इ
कारे दरिद्रानिरूपितान्तत्वस्य च नातिदेशः वस्तुतस्तु चिन्त्यमिदम् समासं नयने एकप्रातिपदिकत्वस्य दरिद्राधातो इवर्णान्तधातुत्वस्य च
अतिदेशस्य दुर्वारत्वात् निजौ चत्वार एकाच इति भाष्यासङ्गतेश्च अस्मन्मते च स्वस्मिन् स्वघटितत्वे स्वघटकत्वे चायातीति न भाष्यासङ्गतिः नच
अनया परिभाषया पदप्रतिपाद्यधर्मस्यैवातिदेशो भवतीति न च ख प्रातिकत्वादेरतिदेश इति वाच्यम् एवमपि रामशब्दादौ जराशब्दान्तत्वादेरतिदे
शापत्तेः नच यत्र विशेषणीभूतो धर्मोऽतिदेशमनारा सिद्धः तद्घटितधर्मस्यैवानयातिदेश इति न दोष इति वाच्यम् एवमपि दधीत्यत्राच्त्वस्य सिद्ध
त्वेन तद्घटिताजव्यवहितपूर्वत्वस्यातिदेशे यणापत्तेः नच व्यपवर्गधर्मस्यानेनातिदेशो न भवतीति न दोष इति वाच्यम् एवमपि रामेणेत्यादौ रामेस्य च
पूर्वत्वस्य सिद्धत्वेन पूर्वपदत्वस्यानेनातिदेशे प्रातिपदिकान्तेति णत्वविकल्पस्य स्तोकादागतः स्तोक इत्यादौ अणि च रमावयवस्य सिद्धत्वेन
समासचरमावयवत्वरूपोत्तरपदत्वस्यानेनातिदेशे पंचम्याः स्तोकादिभ्य इत्यलुकश्चापत्तेर्दुर्वारत्वादिति दिक् व्यतिस इति नच राच्छूनेघटत्व
घटितत्वयोरेवानेनातिदेशात्सूत्रेति तिङन्तत्वादेरभावात्कथं पदत्वमिति वाच्यम् यथोद्देशपक्षे दोषाभावात् नच कार्यकालपक्षे दोषः व्यवस्थितप
क्षयोरन्यतरपक्षेण दोषनिर्वाहे पक्षान्तरेण दोषवदानस्यानुचितत्वात् कार्यकालपक्षेपि इः व्यतिसे इत्यादौ तद्घटितान्ततदादित्यतिङन्तत्वादर्शनेतु
शक्यत्वाच्च एकस्मिन्निसस्यापर्यालोचनयेति चिन्त्यमिदम् स्वस्मिन्स्वघटकत्वं स्वघटितत्वमेवायातीति कल्पनेन भाष्यसामंजस्यात् अयं
मे ज्येष्ठ इत्यादि ज्येष्ठत्वं च यत्किंचित्पुत्रसमुदायविशिष्टत्वम् वै. स्वघटकत्व, स्वघटकपुत्रोत्पत्तिध्वंसानधिकरणक्षणवृत्त्युत्पत्तिकत्व, एतदुभयसं
बंधेन एवं कनिष्ठत्वमपि यत्किंचित्पुत्रसमुदायविशिष्टत्वम् वै. स्वघटकत्व, स्वघटकपुत्रोत्पत्तिप्रागभावानधिकरणक्षणवृत्त्युत्पत्तिकत्व, एतदुभयसं
बंधेन एवं मध्यमत्वमपि स्वाभाववत्त्वम् अभावश्च स्वघटकानुत्तरत्व, स्वविशिष्टभिन्नत्व एतदुभयसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः वै. स्वघट
कपुत्रोत्पत्तिध्वंसाधिकरणक्षणवृत्त्युत्पत्तिकत्व, स्वघटकपुत्रोत्पत्तिप्रागभावाधिकरणक्षणवृत्त्युत्पत्तिकत्व, एतदुभयसंबंधेन एकपुत्रसत्वे स्वघटका
नेतरत्वस्याभावात्स्वाभावः सुलभः बहुपुत्रसत्वे निरुक्तोभयसंबंधेन स्वविशिष्टस्य सत्वेन स्वविशिष्टभिन्नत्वस्याभावात्स्वाभावः सुलभ इति बोध्यम्

त

त्व

५।
३२

अथवा मुख्यज्येष्ठभिन्नत्वे सति मुख्यकनिष्ठभिन्नत्वे सति यत्किंचित्पुत्रससमुदायघटकत्वम् मध्यमत्वम् ज्येष्ठमुख्यत्वं च स्वघटकत्व, स्वघटकपुत्रोत्पत्तिध्वं
सानधिकरणक्षणवृत्त्युत्पत्तिकत्व, स्वघटकपुत्रोत्पत्तिप्रागभावाधिकरणक्षणवृत्त्युत्पत्तिकत्व, एतत्त्रितयसंबंधेन यत्किंचित्पुत्रसमुदायविशिष्ट
त्वम् एवं कनिष्ठमुख्यत्वमपि स्वघटकत्व, स्वघटकपुत्रोत्पत्तिप्रागभावानधिकरणक्षणवृत्त्युत्पत्तिकत्व, स्वघटकपुत्रोत्पत्तिध्वंसाधिकर
णक्षणवृत्त्युत्पत्तिकत्व, एतत्त्रितयसंबंधेन यत्किंचित्पुत्रसमुदायविशिष्टत्वम् यत्तु यत्किंचित्पुत्रसमुदायविशिष्टत्वं मध्यमत्वम् वै॰ स्वघटकपुत्रोत्पत्ति
ध्वंसाधिकरणक्षणवृत्त्युत्पत्तिकत्व, स्वघटकपुत्रोत्पत्तिप्रागभावाधिकरणक्षणवृत्त्युत्पत्तिकत्व, स्वघटकत्व, एतत्त्रितयसंबंधेनेति तन्न एकपुत्रस
त्वे लक्षणस्याव्याप्तेरिति दिक् —— ग्रहणवता प्रातिपदिकेनेति ग्रहणवत्प्रातिपदिकत्वं च उगिद्भिन्नत्वे सति वर्णभिन्नत्वे स
-ति प्रत्ययभिन्नत्वम् अत्र प्रथमसत्यन्तदानेन उगितश्चेत्यादौ न दोषः द्वितीयसत्यन्तदानेन अतइञित्यादौ न दोषः तृतीय
विशेषणदानेन यञिञोश्चेत्यादौ न दोषः न च अस्मायामेधाइत्यादावसन्नादित्यर्थे न स्यात् निरुक्तग्रहणवत्प्रातिपदि
कत्वस्य सत्त्वेनानेन निषेधात् न च असरूपप्रातिपदिकासम्भवादेव तदन्तविधिः स्यादिति वाच्यम् असुक्षेपणे इत्यस्मात्
क्विपि असित्यादौ विन्यर्थे असेर्ग्रहणस्य चारितार्थ्यादिति वाच्यम् अनिनस्मिन्निति परिभाषया वर्णबोधकत्वस्यापि दं
शेनादोषात् यत्तु सर्वत्वव्याप्यधर्मावच्छिन्नबोधकत्वं ग्रहणवत्प्रातिपदिकत्वमिति तन्न ष्ठ्यान्त्वइत्यादौ तदन्तविधा
पत्तेः धात्वादावपि ष्ठ्वत्वस्य सत्त्वेन प्रातिपदिकत्वव्याप्यत्वस्याभावात् यदपि प्रातिपदिकमात्रवृत्तिविषयताप्रयोजकत्वं ग्र
हणवत्प्रातिपदिकत्वमिति तदपि न अतइञित्यादौ अतपदस्य प्रातिपदिकमात्रवृत्तिविषयताप्रयोजकत्वेन तदन्तविध्यनापत्तेः न च
विषयतायां प्रातिपदिकमात्रवृत्तित्वं च प्रातिपदिकवृत्तित्वे सति प्रातिपदिकेतरावृत्तित्वम् अवृत्तित्वं चाभेदेनान्वयेनाप्रयोज्यं विव
क्षितमिति नोक्तदोष इति वाच्यम् ष्ठ्यान्त्वइत्यादौ तदन्तविध्यापत्तेः तदन्तविधिर्नास्तीति यथा तदन्तविधिर्न स्यात्तथा कार्यमित्यर्थः

प्रातिपदि

तथा चैतत्परिभाषाविषये प्रातिपदिकादिति विशेषणमिति दिक्॥

८

व्यपदेशिवद्भावोऽप्रातिपदिकेन

[illegible]

इसं परिभाषा सूत्रोपात्तानादि विवक्षया प्रत्ययविधि विवक्षया प्रातिपदिकमात्रग्रहणार्थ [illegible]

तेनाग्रामणी अनुदात्तादेरञ् इत्यादौ नास्याः प्रवृत्तिः एकयोगोऽयं कर्तव्य इति एकयोगो यथास्यात्तथैव कर्त

व्य इत्यर्थः तेन रत्नानादिति विशेषसिद्धे पृथग्योगकरणं अस्यां ज्ञापकमिति भावः न च सिद्धान्ते पूर्वादिनिरिति

सूत्रारम्भसामर्थ्यात् कृतशब्दस्य नामार्थेन वृत्तिर्भवतीदानीं तस्मादिति वाच्यम् इत्यादौ पूर्वनाद्यसेवप

ठनीये पूर्वनादिनिरिति सूत्रकरणात् कृतशब्दस्य नामार्थेन वृत्तिर्भवतीति कल्पनेनादोषात् वस्तुतस्तु पूर्वं कर्मणोऽ

विवक्षायां भावे पुनः कर्मत्वविवक्षायां द्वितीयायाः साधुत्ववत् भाष्यप्रामाण्येन कृतशब्दस्य नामार्थेन वृत्तौ

बाधकाभावः ॥ ~~[illegible]~~ यादौ प्रत्यये इत्यर्थः कथमिति न च यान्तप्रत्ययास्मन्वादेन यादावित्य

र्थस्यादिति वाच्यं गोमयाच्च व्याण्णानि गोमयानी त्यादौ सम्पाताद् नचैवमपि एकत्वाद्यनितिरीत्यायकारा

—व्यवहितपूर्वत्वनिमित्ते प्रत्ययपरकौ चयोर्भावादौ ओदौतोर्यवावित्यर्थेनादोष इति वाच्यम् हेमानो याती

त्यादौ दोषापत्तेः स्वतो यकारपरकत्वस्य प्रत्ययलक्षणेन प्रत्ययपरकत्वस्य च सत्त्वात् न चैवमपि प्रत्ययेव

५.
१३

यस्मिन् विधि॰ सप्तम्यन्तं अल्ग्रहणं च विधिस्त्वन्तःपाती [illegible] संबन्धावच्छिन्नप्रकारताप्रयोजकत्वेन सम्भावितं यत्तत्त्ववोधार्थं निष्पादितानि रूपकेऽपरं वोध्यमिति परिभाषार्थः। उभयोरेव सम्भवात् लेणवेति वस्तुतस्तु आर्द्धधातुकस्येतिसूत्रे आदिग्रहणं न व्यर्थम् ङ: स्त्रीत्यादौ सादेंपदस्येत्यर्थोऽपि न, सामानाधिकरण्येनान्वयबोधं प्रति समानविभक्तिकत्वस्य तंत्रत्वेन प्रवृत्ते तदभेदसंबंधावच्छिन्नप्रकारताप्रयोजकत्वेन सम्भावितत्वस्याभावेन परिभाषाया अप्रवृत्तेः नच नव्ययीतिलिंगेन सर्वत्र वैयधिकरण्यान्वय एव साध्यत इति परिभाषाव्यर्थेति वाच्यम् उभ्रगोसुगुंपरमकाव, इत्यादौ वांतकदादेशयोरापत्तेरितिदिक् २ घटपटं घटपटाविति नचोद्भूतावयवभेदविवक्षायां घटपटाविति तिरोहितावयवभेदविवक्षायां घटपटमिति प्रयोगोभवत्येवैभीयं परिभाषानावश्यकीति वाच्यम् वृक्षाः वनमिति व्यवस्थयैव प्रयोगदर्शनेन एकस्मिन् प्रयोगे उद्भूतावयवतिरोहितावयवभेदविवक्षयोरभावेन परिभाषाया आवश्यकत्वात् बहुवचनग्रहणमस्यां ज्ञापकमिति नच फल्गुनीप्रोष्ठेतिसूत्रान्नक्षत्रग्रहणे अनुवर्तमाने पुनर्नक्षत्रग्रहणं नक्षत्रप्रधानद्वंद्व एव प्रवर्तत इति पुनरपि बहुवचनग्रहणं व्यर्थमिति वाच्यम् बहुवचनपदाभावे नक्षत्रग्रहणसामर्थ्यान् जातिप्राधान्ये जातिरप्राणिनामिति एकवद्भावे एकवचनस्य स्थाने बहुवचनापत्तेः बहुवचनग्रहणसत्वे तु तस्यैव स्थाने भवतीति न दोषः ३

द्विवचनं

रामाविप्यादौ कार्यकाले कथं पद इति चेत् अकारीयम् पदसंज्ञा द्वीयथोद्देश्यपक्षे एव इति पूर्वग्रन्थविरोधः न च असाधुत्वासिद्धत्वं
रामस्य निमित्तकैवै [illegible] ठस्यात् इति तत्तु द्विरोध इति वाच्यम् रामादौ कार्यकालपक्षे नलोपविधायकशास्त्रे कवाक्यत्वे
न असिद्धत्वाद् संज्ञया बाधाना प्रतौ नलोपापत्तेरिति वाच्यम् एवकारेण विधिदेशीयत्वरूपकार्यकालपक्षाश्रयणस्य कवाक्ये
नादोषात् एकदेशविकृतमिति षष्ठीतत्पुरुषो वा सप्तमीतत्पुरुषो वा तृतीयातत्पुरुषो वा बहुव्रीहिर्वा पूर्वकल्पत्रये अवच्छे
दकसंबन्धेन तत्पर्थः बहुव्रीहौ चावच्छेदकत्वं पञ्चम्यर्थः एकदेशविकृतत्वं च यादृशसमुदाये एकदेशावच्छेदेन विकारो जातः
तत्समुदायविशिष्टत्वम् वैशिष्ट्यं च स्वघटकोद्देश्यकविकारप्रतियोगीतरस्वघटकयावद्घटितत्व, स्वघटकोद्देश्यकविकार
प्रतियोग्यघटितत्वस्य विशिष्टाघटितत्व, एतत्त्रितयसंबन्धेन स्वैवैशिष्ट्यं च स्वाघटकत्व, स्वघटकमात्रोद्देश्यकविकाराघटकत्व,
एतदुभयसंबन्धेन ~~प्र०सं०दानेन~~ प्रथमसंबन्धप्रदानेन राद्यादेर्नैकदेशविकृतत्वम् द्वि० सं० दानेन च रामद्दत्तकारान्तो नैकदेशविकृ
तत्वव्यवहारः तृ० सं० दानेन च रामाविप्याद्यघटितत्वस्य नैकदे० त्वम् तृतीयसंबन्धघटकवैशिष्ट्ये प्र० सं० दानेन च निर्जरस्य
विसत्र निर्जरत्वस्य नैकदेशविकृतत्वम् तत्रैव द्वितीयसंबन्धप्रदानेन च वीवधशब्दे नैकदेशविकृतत्वहानिः तत्रैव मात्रनि
वेशेन रामो इत्यस्य नैकदेशविकृतत्वम् इति दिक् अन्यसादृश्यनिषेध इति न च साद~~[illegible]~~श्यस्य
भेदघटितत्वेन स्वस्मिन् स्वसादृश्याभावादिदमसंगतमिति वाच्यम् वैयाकरणमते सादृश्यस्य भेदाघटितत्वेनादोषात्
अत एव नैवयुक्तन्याये अन्यदिति निर्वितार्थम् अन्यथा सदृशादृत्वेन नैवान्यत् इत्यर्थकमे अन्ये त्यसङ्गतं स्यात् अत एव

स्वस्यस्वेनापिसवर्णसंज्ञाजायते अथवातद्भिन्नत्वेसतितद्गतभूयोधर्मवत्वमितिसादृश्यलक्षणेतद्भिन्नत्वंतन्नि

ष्ठभेदप्रतियोगितावच्छेदकत्वं तथाचस्वस्मिन्नपिद्वित्वादिनास्वभेदस्य सत्वेननदोषः तन्नुक्तमप
 ल

यत्साचार्यइतिनचआकपरिमाणेनायंन्यायइतिवक्ष्यमाणत्वेन इहोव्यतिशब्दत्वस्यआकपरिमाणेसमनि

यततेनआनेतुमशक्यत्वात्तत्रापिपिस्वांशोवाशिष्टार्थेनास्तीतिवाच्यम् हीव्यतिशब्देयादृशार्थबोधकत्वमस्तितादृ
 ख्या

दृशार्थबोधकस्वस्यानयनेननादोषात् आकपरिमाणेनायंन्यायइति आकपरिमाणत्वंचसङ्ख्यपरिमाणत्वएतदन्य

तरव्याप्यधर्मप्रकारकसंशयसामान्यनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयताश्रयत्वम् यथा

निरूक्तान्यतरव्याप्योधर्मःद्वित्वसेटकत्वादितत्प्रकारकसंशयसामान्यंचद्वौवात्रयोवासेटकंवाप्रस्थंवेत्यादि

तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबंधकताद्वौसेटकमित्यादिनिश्चयेतदवच्छेदकविषयताद्वित्वसेटकत्वादावि

 त्व तिलक्षणसमन्वयः आकपरिमाणधर्मसमनियतोपिनायातीतिजराशब्दत्वादेश्चतुष्ट्वादिसमनियतत्वेन

जराशब्दत्वादेर्नैकदेशविकृतन्यायेनातिदेशः अतएव ~~ ~~जरशब्दस्यजरस्इतिकौमुदीव्याख्या

वसरेएकदेशविकृतन्यायेननेत्यस्यस्थानिवद्भावेनेत्यर्थकरणंशेखरकृतस्संगच्छते समनियतत्वंच

स्वव्याप्यत्वेसतिस्वव्यापकत्वम् यथाचतुष्ट्वसमनियतत्वंजराशब्देचतुष्ट्वसमानाधिकरणात्यंता

भावाप्रतियोगित्वस्य ... भाववदवृत्तित्वस्यचसत्वेनास्त्येवेतिसर्वंसमंजसमिति -

३५ व
दि

अथ रामादित्यादौ यश्मो देशपक्षे दोषाभावेनास्य न्यायस्य को प्रयोगः न च ... कालपक्षे दोष इति वाच्यं
अव्यवस्थितपक्षस्य ... ऽन्यतरपक्षेणाऽव्यस्य निर्वाहे पक्षान्तरेण दोषप्रदानस्य अनुचितत्वादिति तत्र तत्र शेखरे
उक्तत्वात् सुबन्तात् ...स्य स्थानिवद्भावेनानेतु दोषप्रसक्त्वेन कार्यकालपक्षेपि दोषाभावाच्चेति चेन्न मैवम्
आरहादौ पुनरभ्याससंज्ञार्थं एकदेशवि
कृतन्यायस्यावश्यकत्वात् न च ... ऋ ऋ ... अ इति स्थिते पूर्वोऽभ्यास इत्यस्य द्विर्वचनीयविधेयताश्रया
वधिकपूर्वत्वविशिष्टोऽभ्याससंज्ञको भवतीत्यर्थकरणेन एकदेशविकृतन्यायानङ्गीकारेपि ऋ इत्यस्येयोर
इत्यौ न र अरित्यत्रापि द्विर्वचनीयावधिकपूर्वत्वस्य सत्वेनादोष इति वाच्यम् इयरतोदेभगुरिसादौ इयर
तावित्यस्य अभ्याससंज्ञापत्तेः न च अत्र सत्या अभ्याससंज्ञाप्रयोजकप्रत्ययनिमित्तकार्यावयवाभ्यासस्यादिर्हलः
शिष्यत इति हलादिः शेष ... इत्यस्य अर्थकरणेनादोष इति वाच्यम् ऊर्णुनविषतीत्यादौ ऊर्णु इत्यस्याभ्याससं
ज्ञायां न...हलादिशेषस्य दुर्वारत्वात् तस्मात् पूर्वोऽभ्यास इत्यस्य द्विर्वचनीयविधेयताश्रयद्विर्वच
नीयोद्देश्यताश्रये तदुभयमात्रारब्धसमुदायघटको द्विर्वचनीयविधेयताश्रयावधिकपूर्वत्वविशिष्टोऽभ्याससं
ज्ञो भवतीत्यर्थः कर्तव्यः तथा च अर् इत्यत्र निरुक्तसमुदायघटकत्वस्याभावेन अर् ऋ इत्यत्र निरुक्तसमुदायत्वानयना
र्थमेकदेशविकृतन्यायस्यावश्यकत्वादिति चेत् परन्तु पूर्वोऽभ्यास इत्यस्य द्विर्वचनीयविधेयताश्रयद्विर्वचनीयोद्देश्यता
श्रयएतदुभयमात्रारब्धसमुदायसमभिव्याहृतवर्णाघटितो द्विर्वचनीयविधेयताश्रयावधिकपूर्वत्वविशिष्टोऽभ्याससं
ज्ञको भवतीत्यर्थकरणेनारित्यस्याभ्याससंज्ञाभवत्येवेति एकदेशविकृतन्यायानङ्गीकारेपि न कोपि दोष इति प्राहुः

नन्वेवं
छिन्द्यादित्यादिति नचाभिंतादि त्तिरसंनस्यात् पुनः प्रसंगविज्ञानन्यायेन तातङः स्थाने प्येरेव जायमानत्वात् नचातातङ् विधानं व्यर्थमि-
तिवाच्यम् जुहुतादित्यादौ तातङः बाधितात्वापत्तेः नच भिंतादितिरूपमेव न भविष्यतीति वाच्यम् तातङि प्रतिषेधो वक्तव्यो न वक्तव्यः
सकृद्गतौ विप्रतिषेधे यद्बाधितं बाधितमेवेति स्थानिवत्सूत्रभाष्यवार्तिकविरोधादिति वाच्यम् नन्वे (स्थानिवत्) वं तिस्थणामित्यत्र
परत्वात्तिस्रादेशे नुण्न स्यादित्यस्योपलक्षणीयत्वेनादोषात् यत्तु भिंधकीत्यादौ परत्वाध्यादेशे अकज्न स्यादित्यस्योपलक्षणमिति
तन्न भिंधकीत्यादौ अंतरंगत्वादकचि निर्दिश्यमान त्वाभावाद्धिर्न स्यादिति कुत्सायामिति सूत्रभाष्येण विरोधात् यदपि तातङ्
स्य तातङ्भावे नेत्यर्थः तथाच तातङ्भावपक्षे धिर्न स्यादित्यवतरणसङ्गतिरिति तदपि न अस्या अप्राप्तविभाषात्वेनाभावस्य
सिद्धतया अभावविधायकत्वासम्भवात् अन्यथा मुमुक्षतइत्यादौ मुचोऽकर्मकस्येति गुणाभावपक्षे अत्रलोपइत्यभ्यासलोपस्य
दुरुद्धरत्वादिति दिक् पर्यायेण तजादिवदिति अयमभिसंधिः असति बाधके अवच्छेदकावच्छेदेन विधेयान्वय इति सिद्धान्तः अवच्छेदकावच्छेदेन विधेयान्वय
इत्यस्य उद्देश्यतावच्छेदकव्यापकत्वं विधेये, विधेयसंसर्गे वा संसर्गमर्यादया भासत इत्यर्थः तथाच सुपित्वे सस्य यजादिसु व्यवहितपूर्वत्वविशिष्ट अदनाङ्
-व्यापकोटी कोभवति वद्रुवच सस्येदित्यस्य सत्वादिवक्रुवचनसु व्यवहितपूर्वत्वविशिष्टं दंताङ् त्वव्यापकमेसंभवतीत्यादिक्रमेणार्थः तथाचरामेभ्यइत्यादौ दीर्घाभावे दीर्घे
निरुक्तव्यापकत्वं बाधितम् एत्वाभावे तत्र च व्यापकत्वं बाधितमिति तजादिवत्पर्यायेण भवतीति वक्तव्यं नच विकल्पशास्त्रवत् निरुक्तस्थले उद्देश्यतावच्छेदकसा
मानाधिकरण्येनैव विधेयान्वयः स्वीयते नच केवलस्य पचइत्यादे प्रयोगस्यादिति वाच्यम् परश्चेति शास्त्रेण प्रत्ययः परो भवत्येवेति नियमेन न केवलप्र
प्रकृतिः प्रयोक्तव्या नच केवल पचइति न्यायेन केवलप्रकृतिप्रयोगप्रसङ्गस्याभावादिति वाच्यम् रुकृदिकु रीग्विषये ते उद्देश्यतावच्छेदकसामानाधिक
रण्येनान्वयस्वीकारे रुगागमे धर्वार्ति तस्यापिप्रयोगस्य प्रसंगात् पर्यायपदार्थश्च अन्यतरत्वादिना व्यापकत्व — व्यापकत्वावच्छेदकमन्यतरत्वादीति

प.

अथवा तत्तद्विधेयतावच्छेदकरूपमेव व्यापकतावच्छेदकं । तत्तदुद्देश्यतावच्छेदकव्या
पकत्वं [illegible] धिकरणं च यादृशविधेयतावच्छेदकावच्छिन्ने व्यापकत्वं वक्तव्यं तदितरः स्वीयोद्देश्यतावच्छेदकावच्छिन्नो
द्देश्यतानिरूपितविधेयताश्रयश्च यस्तदनधिकरणं बोध्यम् तथा च ण्वुल्तृचावित्यादौ तृचि धातुत्वव्यापकत्वं च धातुत्वाधिकरणं यत् ण्वुलनधिकरणं
त[illegible] इति अत्यन्ताभावाऽप्रतियोगित्वम् एवं ण्वुलि धातुत्वव्यापकत्वलक्षणमपि धातुत्वाधिकरणं [illegible]जनधिकरणमित्यादि बोध्यमिति संक्षेपः
स्वस्वनिमित्तानन्तर्यासंभव इति अयं भावः इको यणचीत्यादौ आनुमानिकस्थान्यादेशकत्वे ऽजव्यवहितपूर्वत्वविशिष्टेग्घटितस्य स्थाने यण्घटितत्वं भ
वतीत्यर्थे सुधी उपास्य इत्यस्य स्थाने सुध्य् इति यानास्याव्याप्तिरिति अचीत्यादिनिमित्तादिबोधकपदानामवश्यं अजव्यवहितपूर्वत्वविशिष्टेग्घटित
स्य अजव्यवहितपूर्वत्वविशिष्टयण्घटितं भवतीत्यादिक्रमेणार्थो वाच्यः तथा च शिष्टादित्यादौ स्वस्वनिमित्तानन्तर्यासंभवस्स्पष्ट एवेति वस्तु
तस्तु अचीत्यादिपदावृत्तेर्नोपयोगः आवृत्तिस्वीकारेऽपि सुधी उपास्य इत्यस्य स्थाने सुध्य् इत्युकारानादेश्यस्य मनीष्युपास्यो मध्वरिरित्याद्या
देशस्य दुष्करत्वेन स्थानेऽन्तरतमपरिभाषया शरणीकरणीयत्वेन तत्साम्यनार्थिकत्वसमानवर्णानां तत्तदादेशा इति अनुमपत्तेरभावात्
शाधीत्यादौ विरोधश्च साधुत्वासाधुत्वयोस्स्पष्ट एव तथाहि शा हाविति शास्त्रेण शाहि इत्यस्य साधुत्वं तदितरस्यासाधुत्वं बोध्यते कुसल्भ्यो
हेर्धिरित्यनेन शास्धि इत्यस्य साधुत्वं तदितरस्यासाधुत्वं तथा च एकस्यैव एकेन साधुत्वमन्येन चासाधुत्वं बोध्यत इति दिक् —— ——
परान्नित्यं बलवत् कृताकृतप्रसंगित्वादिति ननु अयं हेतुः सुलुनीत्यादौ व्यभिचरितः नुमि कृताकृतप्रसंगित्वस्य सत्त्वेऽपि बलवत्त्वाभावात् ×ह्रस्वापेक्षया×
एवं रमायामित्यादावपि हेतुर्व्यभिचरितः कृताकृतप्रसंगिनियाटि आमपेक्षया बलवत्त्वस्याभावेन हेतोस्साध्याभाववद्वृत्तित्वादिति चेन्न बहिरङ्ग
त्वाभाववत्त्वे सति उत्सर्गत्वाभाववत्त्वे सति कृताकृतप्रसंगित्वादिति हेतोर्विवक्षणेनादोषात् लोकव्यवहारद्वयमिति वस्तुतस्तु दृष्टान्तदानमसंगतम्
वालिसुग्रीवयोर्युध्यमानयोर्वालिनो रामेणैव हतत्वेन कुरुपाण्डवेषु युध्यमानेषु वासुदेवेनैकस्याप्यहतत्वेनाधिक्यबीजस्य स्पष्टत्वात् अंतर्यामितया
प्रेरणं तु जगत्साधारणमिति दिक्

नित्यादप्यन्तरङ्गं बलीय इति एतस्य फलं सुद्धुनीति अत्र नियममपि नुमं बाधित्वाऽनारङ्गत्वात् ह्रस्वः न च क्रमिकान्वाख्याने ह्रस्वप्रवृत्तिवे
लायां नुमः प्राप्त्यभावेन नैतदुदाहरणमिति नित्याद् अन्तरङ्गस्य बलवत्त्वे किमुदाहरणमिति वाच्यम् केशा इत्युदाहरणस्य सत्त्वात् अत्र नियम
मपि गुणं बाधित्वाऽन्तरङ्गत्वात् सवर्णदीर्घः अन्तरङ्गनिमित्तसमुदाय इति परिष्कारद्वये अनारङ्गत्वं बहिरङ्गत्वमुपलक्षणमिनान्योन्याश्रयः
अनारङ्गत्वात्त्रयादेश इति न चानारङ्गत्वात्त्रयादेशेऽपि पुनस्तिस्रादेशे नुटि दीर्घनिषेधार्थं न तिसृ इति चरितार्थमिति वाच्यम् अन्तरङ्गत्वा
त्त्रयादेशे नुटि दीर्घेषु पश्चात्तिस्रादेशे लक्ष्ये लक्षणन्यायेन दीर्घाप्राप्त्या न तिसृ इति निषेधवैयर्थ्यस्य स्पष्टत्वात् न चैवमपि
त्रेस्त्रय इत्यत्र त्रेरिति आमीति च विशिष्टरूपोपादानसत्त्वेन त्रित्वत्वेन त्रित्वरूपार्थनिमित्तकत्वं बहुत्वत्वेन बहुत्वरूपार्थनि–
मित्तकत्वं च त्रयादेशस्य एवं तिस्रादेशस्यापि स्त्रीत्वत्वेन स्त्रीत्वरूपार्थनिमित्तकत्वं त्रिचतुरोरिति विशिष्टरूपोपादानसत्त्वेन त्रि
त्वत्वेन त्रित्वरूपार्थनिमित्तकत्वं तिस्रादेशस्येति अनारङ्गत्वात्त्रयादेश इति ग्रन्थासङ्गतिः उभयोरपि अर्थद्वयनिमित्तकत्वादिति
वाच्यम् स्वं रूपमिति प्रसारमानस्यैकदेशयुक्तित्वेन सूत्रकृन्मते अर्थत्वेनार्थनिमित्तकत्वस्योभयत्र तुल्यत्वेऽपि स्त्रीत्व
त्वेन स्त्रीत्वरूपार्थनिमित्तकत्वेन तिस्रादेशो बहिरङ्गत्वस्य स्पष्टत्वात् एवमादेरपरनिमित्तकत्वेनान्तरङ्गत्वाच्चेति अत्र च प्रमाणं ऊकालो
इति निर्देशः अन्यथा समाहारद्वन्द्वे परत्वात् सवर्णदीर्घे पश्चान्नपुंसकह्रस्वे उकालइत्येव वदेत् एवमतो मित्त्वात्र तपरकरणमपि
प्रमाणं तद्धि अश्च आश्चेति समाहारे आइ इत्यत्र ह्रस्वो मा भूदित्येतदर्थं अन्यथा परत्वात् सवर्णदीर्घे पश्चाद्ध्रस्वत्वे तद्वैयर्थ्यं
स्पष्टमेव एवं भाष्यमानोऽप्यकार इति परिभाषापि प्रमाणं अन्यथाऽदसोऽसेरित्यत्र समाहारेणैव सिद्धे तदसङ्गतिः स्पष्टैव
एतस्य फलानि च अ … इति समाहारे आ इ अश्च इश्चेति ई उश्च ऊश्चेति समाहारे ऊ इत्यादीनि

प.

३७ नचापरनिमित्तमनारङ्गमितिस्वीकारेनामीतिसूत्रभाष्यविरोधः तत्रहि आमीतिन्यासेपरत्वाद्दीर्घेभूतपूर्वह्रस्वान्तत्वमा- दायनुडित्युक्तम् एवं अचस्तास्वदितिसूत्रस्थभाष्यविरोधः तत्रहि जहर्थेत्यादौ इण्निषेधाभावमाशङ्क्य उपदेश पदापकर्षेणसमाहितम् उभयत्रापिअपरनिमित्तकत्वेनानारङ्गत्वानुडिण्निषेधयोस्तद्विरोधस्यस्पष्टएवेतिवाच्यम् अपूर्व निमित्तकत्वेसतिअपरनिमित्तकत्वमनारङ्गत्वमितिपरिष्कारेणादोषात् नचैवमपि दुद्यूषति सुस्यूषतीत्यादौ अपरनि मित्तकत्वेनानारङ्गत्वाच्चणःपूर्वंद्वित्वंस्यादितिवाच्यम् अंतर्भूतनिमित्तकत्वरूपानारङ्गत्वस्यणिसत्वेनापरनिमित्तरूपा नारङ्गत्वस्यद्वित्वेसत्वेनोभयोस्तुल्यबलत्वेनपरत्वात्णिदोषाभावात् परनिमित्तकशास्त्रस्य अपरनिमित्तकशास्त्रस्य च आश्रीयमाणसमुदायोयत्रान्यूनानतिरिक्तस्तत्रैवापरनिमित्तकत्वरूपानारङ्गत्ववतोबलवत्वंस्वीक्रियत इतिदोषा भावात् नचैवं ऊकालइतिनिर्देशासंगतिः तत्रह्रस्वसवर्णदीर्घयोराश्रीयमाणसमुदाये अन्यूनानतिरिक्तत्वयोरभावा दितिवाच्यम् ऊकालइत्यादौसमाहारगर्भितसमाहारेणैवोपपत्तौ गुरुद्विनिर्देशःप्रमाणंभवितुमर्हतीतिज्ञापकविरो- धाभावादितिदिक् यथाबाधितत्वादनित्यइति नचतदंतविधिकल्पेयणंबाधित्वानशब्दमाश्रित्यगुणइतिगुणस्या[illegible] नारङ्गत्वात्गुणस्यैवप्राप्त्यागुणस्यापिनित्यत्वात्सिद्धनइतिस्थिते ऊं बाधित्वापरत्वात्गुणेनागेशमतेभाष्यासङ्गतिस्स्यादेवेति नारङ्गत्वात्गुणस्यैवप्राप्त्या... शब्दानारस्यप्राप्नुवन्विधिरनित्योभवतीतिगुणस्यानित्यत्वेननित्यत्वात्पूर्वमूठिभाष्यसङ्गतेः ॥ ॥

वाच्यम् शब्दा [illegible]

सप्तम्याद्युपात्तमेव निमित्तं गृह्यते इति। अयंभावः बहिरङ्गत्वेन जिघृक्षित शास्त्रविशिष्टत्वम् वै॰ स्वघटक सप्तम्यन्त पञ्चम्यन्तान्यतर प्रयोज्य विषय
ताश्रयत्वेनाश्रीयमाणो यावान् शब्दसमुदायस्तद्घटकवर्तिर्या सप्तम्यन्त पञ्चम्यन्तान्यतर पदप्रयोज्यविषयता तादृशविषयताप्रयोजकपदघटित
त्वमनरङ्गत्वम् यथास्योनङ्ग्रसादौ बहिरङ्गत्वेन जिघृक्षितं शास्त्रमिकोयणचीति तद्घटकं सप्तम्यन्तमचीति तत्पदप्रयोज्यविषयताश्रयत्वेनाश्रीय
माणः समुदायः ऊन इति तद्घटकं न इति तद्वर्तिर्या सप्तम्यन्त पञ्चम्यन्तान्यतरप्रयोज्यविषयता आर्द्धधातुकपदप्रयोज्यविषयता तादृशविषयताप्रयोज
कं पदं आर्द्धधातुकपदं तद्घटितत्वं पुगन्तलघूपधस्य चेत्यत्रेति लक्षणसमन्वयः विपरीतं तु न। बहिरङ्गत्वेन जिघृक्षित पुगन्तेति शास्त्रघटकार्द्ध
धातुके इति पदप्रयोज्यविषयताश्रयत्वेनाश्रीयमाण न घटकवर्तित्वस्य इकोयणचीत्येतद्घटकाच्पद प्रयोज्यविषयतायामभावात् न चैवमपि ज्ञाप
कपरभाष्यविरोधः ~~…~~ वाहऊठि सप्तम्यन्तपञ्चम्यन्तान्यतरपदाभावात् एवमसुस्नुवदित्यादि लक्ष्यासङ्ग्रहश्च बहिरङ्गत्वे
न जिघृक्षित पुगन्तेति शास्त्रघटकार्द्धधातुकपदप्रयोज्यविषयताश्रय तद्दसेत्यद्घटक वर्तित्वस्य अचिश्नु इत्येतद्घटकाच्पदप्रयोज्य विष
यतायामभावादिति चेति वाच्यम् ~~…~~ बहिरङ्गत्वेन
जिघृक्षितशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नत्वेनाश्रीयमाणो यावान्शब्दसमुदायः तद्घटकवर्तिर्या सप्तम्यन्तपञ्चम्यन्तान्य
तरपदप्रयोज्यविषयता तादृशविषयताप्रयोजकपदघटितत्वमनरङ्गत्वमित्यपि परिष्कारेणादोषात् बहिरङ्गत्वेन जिघृक्षितं वाहऊठिति
तदीयोद्देश्यतावच्छेदकावच्छिन्नत्वेनाश्रीयमाणः शब्दसमुदायः प्रसयत्लक्षणेन विश्ववाह ण्वि इति तद्घटक ण्वि इति तद्वृत्ति विषयताप्रयोजकं
आर्द्धधातुकपदं तद्घटितत्वं पुगन्तेत्यत्रेति लक्षणसमन्वयः एवं बहिरङ्गत्वेन जिघृक्षितं शास्त्रं पुगन्तेति तदीयोद्देश्यतावच्छेदकावच्छिन्नत्वेनाश्रीय
माणः शब्दसमुदायः असुस्नु अत् इति तद्घटकं अ इति तद्वृत्ति विषयताप्रयोजकमचीति पदं तद्घटितत्वमचिश्नुवित्यत्रेति लक्षणसमन्वयः
पूर्वलक्षणानुस्योनङ्ग्रति भाष्यस्थापनाय, द्वितीयलक्षणं ज्ञापकपरभाष्यस्थापनाय लक्ष्यसंग्रहाय चेति विवेकः ११

पृ० ३८

परंतु बहिरङ्गत्वेनाजि~~[illegible]~~घ्रक्षितशास्त्राविशिष्टत्वमंतरङ्गत्वम् वै० स्वघटकपदप्रयोज्योद्देश्यतापर्याप्त्यधिकरणसमुदायघटकवृत्ति
सप्तम्यन्तपञ्चम्यन्तान्यतरपदप्रयोज्यविषयताप्रयोजकपदघटितत्वं, स्वघटकपञ्चम्यन्तपदप्रयोज्यविषयतापर्याप्त्यधिकरणसमुदा
यघटकवृत्तिसप्तम्यन्तपञ्चम्यन्तान्यतरपदप्रयोज्यविषयताप्रयोजकपदघटितत्वं, स्वघटकसप्तम्यन्तपदप्रयोज्यविषयताश्रयमात्रारब्ध
समुदायघटकवृत्तिसप्तम्यन्तपञ्चम्यन्तान्यतरपदप्रयोज्यविषयताप्रयोजकपदघटितत्वं, एतदन्यतमसंबंधेन स्वं पुगन्तेति तद्घटकं पदप्र
योज्योद्देश्यतापर्याप्त्यधिकरणं असुस्तु अ इति तद्घटक~~[illegible]~~ अ इत्येतद्वृत्तिविषयताप्रयोजकमचीति सप्तम्यन्तम् तद्घटितत्वमचिश्वि
त्वत एवं समातोऽङि तद्इति तद्घटकं पञ्चम्यन्त आत् इति तत्पदप्रयोज्यविषयतापर्याप्त्यधिकरणं गा अ आते इत्यत्र गा अ इति त
द्घटक~~[illegible]~~ अ इत्येतद्वृत्तिविषयताप्रयोजकाचीत्येतत्सप्तम्यन्तघटितत्वम~~[illegible]~~कस्सवर्णे दीर्घ इत्यत्रेति एवं बहिरङ्गत्वेन जिघ्रक्षितं शास्त्रं
णौ चङीति तद्घटकं सप्तम्यन्तं णाविति चङीति च तत्प्रयोज्यविषयताश्रयमात्रारब्धस्समुदाय अमूमुदद् इत्यत्र इ अ इति त
द्घटकं इ इति तद्वृत्तिविषयताप्रयोजकं पदं आर्द्धधातुकपदं तद्घटितत्वं सार्वधातुकार्द्धधातुकयोरित्यत्रेति लक्षणसमन्वयः
एवं परिष्कारे साधकपरमाप्यविरोधोऽपि न वाहऊठ्सूत्रस्य पदप्रयोज्योद्देश्यतापर्याप्त्यधिकरणसमुदाये प्रसयलक्षणेन घटके ण्वो
पुगंतेति शास्त्रघटकआर्द्धधातुकपदप्रयोज्यविषयतायाः सत्वात् एवं येनविधिस्तदन्तस्येति सूत्रभाष्यविरोधोऽपि न इको यणचीत्येतद्घटका
मदप्रयोज्यविषयताश्रयमात्रारब्धसमुदायघटकेन शब्दे आर्द्ध~~[illegible]~~धातुकपदप्रयोज्यविषयतायास्सत्वात् विपरीतं तु न पुगंते
तिशास्त्रघटकपदप्रयोज्योद्देश्यतापर्याप्त्यधिकरणास्तिउ एतत्समुदायघटके एवं एतच्छास्त्रघटकसप्तम्यन्तपदप्रयोज्य
विषयताश्रयमात्रारब्धसमुदाय नेत्येतद्घटके वा इको यणचीत्येतद्घटकाच्पदप्रयोज्यविषयताया अभावात् पूर्वोक्तद्वि
तीयपरिष्काररीत्या स्योनइत्यादौ इको यणचि पुगन्तलघूपधस्य उभयोरप्यन्तरङ्गं संदुर्वारमेव ~~[illegible]~~

भाष्योक्तेरिति अथ जातासिद्धत्वबोधिका परिभाषा वलि लोपेन प्रवर्तते अथवा वलिलोप इत्यस्य यलोप इत्यर्थः क्रियत इति भाष्य
विरोधः अत एव चेलेक्नोपेरिति निर्देशस्सङ्गच्छते अन्यथा युक्तो बहिरङ्गत्वेनासिद्धत्वात् यलोपाद्यप्राप्त्या स्यात् इत्यसङ्गतिस्स्यादेव अत एवेन्द्रमा
पयतिर्युवजानिरित्यादौ यलोपसिद्धिः अन्यथा युक्तो बहिर्भूतणिज्निमित्तकत्वेन निङ्ङपदद्वयसापेक्षत्वेन च बहिरङ्गत्वेन तदसिद्धिस्स्यादेव
एवं च वलिलोपे न्तरङ्गपरिभाषा न प्रवर्तत इति कथं खण्डयत इति चेन्न निरु रङ्गत्वपरिष्कारे द्वितीयत्वस्य साक्षात्स्वस्थानि द्वारा वा
विवक्षितत्वेन युक्तस्य साक्षाद्वा निरुक्तसमुदायघटकस्थानि द्वारा वा निरुक्तसमुदायाघटकत्वेन वलिलोपे न्तरङ्गत्वस्यैवाभावात् निङा
देशस्यासिद्धत्वे पि नकारस्यासिद्धत्वाभावेन युवजानिरित्यादौ दोषाभावाच्च निङादेशस्य स्थानिद्वारा निरुक्तसमुदायघटकत्वे पि नकारस्य
तद्घटकत्वाभावेन वलिलोपे निरुक्तान्तरङ्गत्वस्याभावाच्च अतिदिश्यमानधर्मसमनियतधर्मनिमित्तककार्याभावस्यातिदेशस्वभावसिद्ध
त्वात् जायाया योनिरिति न्यासेन याशब्दस्यान्यादेशे दोषाभावाच्चेति दिक् तद्घटकत्वमित्यं स्व स्थानिद्वारापि विवक्षितमिति अग्नि
भूरित्यादौ न दोषः ऊठः साक्षात्तद्घटकत्वेपि स्थानिद्वारा तद्घटकत्वात् स्त्रियां यत्प्राप्नोति तन्नेतीति नषडिति सूत्रे ङीपुटापावनुवर्तेते
नषडिति सूत्रं च डाबुभाभ्यामित्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयम् तेन त्रियपञ्चाद्रौपदीत्यादौ बभावो पि सिद्धः भूतपूर्व बट्स
मादायेति स्थानिवद्भावेनेति शेषः ऋतीति तुग्ग्रहणं चरितार्थमिति ऋति किम् वृत्रहणनम् तुक् किम् राजायकः अत्र हि नलोपस्या
सिद्धत्वाद्धातोर्गिति नुगमनस्यात् राजशब्दात्क्यङि तदनात्क्विपि अतो लोप यलोपयो रशब्देन समासे तस्मादाचारक्विबन्तात् ण्वु
लि राजायक इति रूपम् वृत्रहण्यामिति न च नलोपस्य पदद्वयसापेक्षत्वेन बहिरङ्गत्वमस्त्येवेति ऋतीति तुग्ग्रहणं व्यर्थमेवेति वा
च्यम् हिमानमित्यादो नुगभावाय ऋतीति तुग्ग्रहणस्य चारितार्थ्यात् अ वर्तमाने क्विपेति ब्रह्मभ्रूणेति नियमाप्राप्तेः

पृ-
३८

जागर्मीति न च द्वग्रे इति न्यासेनैव न दोषः न च भवानीत्यादावपि स्यादिति वाच्यम् मोनइत्येवा इकोरो[?]सामर्थ्येनादोषात् नचैवं
भवामेत्यादावपि स्यादिति मोन इति कर्तुं न शक्यत इति वाच्यम् सेर्ह्यपिच्चेति साहचर्येण एकवचनसंबंधिन एव ग्रहणेनादोषात् इतिवा
च्यम् एवमपि पचावेदमि इत्यादौ आमेत इत्यामादेशस्य दुर्वारत्वात् न च प्रतिपदोक्तस्य एकारोग्रहणात् इति पचावेदमित्यादौ न दोष इति वाच्यम्
एवमपि भवाव पचाव एधुकर्म सु तेभ्यो भवाव पचावेभ्य इत्यादौ प्रतिपदोक्तस्य एकारस्य सत्त्वेन ऐत्वस्य दुर्वारत्वात् परे तु टित आत्मनेपदानां टेरे
त्यत्रः सेल्लिट इत्यत्रयोरेत्वोरेच्च सोऽडामेतः आत्मनेपदानामिति संबंध्यते सवाभ्यां वामौ उत्तमस्यैत आत्मनेपदानामिति एत इति च संबं
ध्यते आ[?]इपिच्च उत्तमस्येति संबध्यते आत्मनेपदानामिति निवृत्तम् एवं च द्विवारमेत इति न कर्तव्यम्[?] भवती सपि लाघवं भवती
-त्याहुः एवमसूसुददित्यादौ णौचङीति ह्रस्वस्यासिद्धत्वात् लघूपधगुणेन केचित्तु क्नोः किं कारणेन भूतपूर्वलघूपधस्यापि गुण इत्युक्तं
शेखरे तत्र भूतपूर्वो यो लघुस्तदुपधस्य इक् तस्य योवा भूतपूर्वो यो लघूपधः इकस्ये वा नाद्यः गुते सादौ गुणापत्तेः नाप्यन्त्यः इन्दाञ्चकारेत्यादौ गु
णापत्तेः तस्मात्प्रत्ययोपदेशकाले यो लघूपध इकस्तस्यार्थः क्नोः किंत्वेन कल्पनीयः तथा च प्रत्ययोपदेशकाले लघूपधत्वस्याभावेना[?]सूषु
ददित्यादौ गुणस्याप्राप्तिरेव नेति न च जागर्तोर्ति दीधोर्ति इत्यादौ गुणो न स्यादिति वाच्यम् यङ्लुकश्छान्दसत्वेनादोषात् न चैवमपि तुर्वीधातोर्व
लितोर्वेत्यादौ प्रत्ययोपदेशकाले लघूपधत्वाभावाद्गुणो न स्यादिति वाच्यम् उपदेशसामर्थ्याद्वकारस्य लोपो न भवतीति वकारप्रसारणानपर
भाष्यविरोधेनास्यानभिधानादित्याहुः अन्ये तु क्नोः किं कारणेन प्रत्ययावयव प्रकृत्यवयव एतदुभयारब्धसंयोगनिमित्तिका गुरुसंज्ञा लघुसंज्ञा न बा
ध्यते प्रत्ययोपदेशकाले यो लघूपध इत्यर्थकल्पनं त्वयुक्तं असूसुवदित्यादौ प्रत्ययोपदेशकाले लघूपधत्वाभावेन गुणस्याप्राप्त्या लघूपधगुणादन्तरङ्ग
-त्वादुवङिति भाष्यासङ्गतेः एवं चासूसुददिति फलं समीचीनमेवेत्याहुः एवं जागृह इत्यादौ संप्रसारणस्यासिद्धत्वात् ऋगादयो न वस्तुतस्तु
ऋदुपधयोर्योभ्यासस्तस्य ऋगादय इत्यर्थे जागृह इत्यादौ ऋगादीनां प्राप्तिरेव नेति

66

एवमदिद्रुपदित्यादौ ह्रस्वस्यासिद्धत्वादत उपधाया इति वृद्धिर्न केचित्तु अदुपधावृद्धिहिते ञ्णितीति अचो ञ्णितीति वृद्धिर्भवतीत्यर्थकरणेन
प्रकृते [illegible] प्राप्तिरेव न च रागादित्यादौ घञोऽदुपधावृद्धिहितत्वाभावेन वृद्धिर्न स्यादिति वाच्यम् घञि च भावकरणयोरित्यत्र
विषयसप्तमीस्वीकारेणादोषादित्याहुः परे तु स्नजयति कनयति इति भाष्यप्रयोगेण ञ्णिति निमित्तककार्यप्रयोज्योपधा
त्ववत अत उपधाया इति वृद्धिर्न [illegible] अत एव [illegible]यतीति शेखरप्रयोगः सङ्गच्छते न च पठ्यतीत्यादौ अचः परस्मिन्निति स्थानिवद्भावेन वृद्धि
वारणपरभाष्यविरोध इति वाच्यम् उपस्थोपायानाशादूषकत्वेनादोषादित्याहुः एवमोजिढत् औजढदित्यादौ द्वित्वादीनामसिद्धत्वा
द्रलोप इति दीर्घो न परे तु लोप इति कर्मणि घञ् [illegible] मानढकाररेफयोः परतः पूर्वस्याणो दीर्घ इति ढो ढे लोप इत्यतः आग्नेव
-दीर्घो जात इति न कोपि दोष इत्याहुः एवं जगदंबेत्यादौ ह्रस्वस्यासिद्धत्वाट्टाप् न न च पुनर्ह्रस्वः स्यात् न च लक्ष्ये लक्षणन्यायेन ह्रस्वो न
स्यादिति वाच्यम् सवर्णदीर्घस्य तन्मात्रोद्देश्यकविकाराभावेन तद्दृश्यत्वस्याभावादिति वाच्यम् एवमप्य[illegible]रिति [illegible]तत्वस्य ज
गदम्बेत्यत्र दुर्वारत्वात् वस्तुतस्तु सन्निपातपरिभाषया जगदम्बेत्यत्र टाप् न अत एव जगदम्बात्रेत्यादौ सवर्णदीर्घस्यासिद्ध
त्वादंबार्थेति ह्रस्वो न यत्तु सुवौ इत्यादौ उवङोऽसिद्धत्वाद् वृद्धिर्नेति तन्न ऊठ्यपि ओः सुपीति यणि सुवाविति रूपसि
द्धेरिति दिक् अनारब्धशास्त्रत्वमस्यालिङ्गमिति तथा च अस्याः परिभाषायाः शास्त्रत्वावच्छिन्नोद्देश्यतावच्छेदकत्वेन
शास्त्रत्वेन रूपेण त्रिपाद्या असिद्धत्वादियं त्रिपाद्यां न प्रवर्तते [illegible] यन्नाह इयं च त्रिपाद्यां न प्रवर्तत इति ऊठ्ग्रहणं ज्ञा-
पकमिति न च विश्वौह इत्यादौ ऊठिदं पदेति स्वरार्थमूठ्ग्रहणमावश्यकमिति वाच्यम् वाह ऊठ् [illegible] इति वान्यासेन सिद्धे ऊठ्ग्रहणस्य
ज्ञापकत्वात् न च ऊठिति सूत्रे ठिदिदमिति न्यासे ऊठ्युपधाग्रहणमिति वार्तिककृदुक्त इत्यादावेव स्वरः स्यात् न तु विश्वौह इत्यादा-
-विति वाच्यम् ठित्युपधाग्रहणं कर्तव्यमिति वार्तिककरणेनादोषात् यत्तु ह्रस्वस्य [illegible] तस्मिन्निति [illegible] विधानं परिभाषायां सा

पक्वमितितन्न ऊठिदं पदे इति सूत्रे ह्रस्वे ऊठि क्रियमाणे जूरइत्यादौ स्वरानापत्तेः नच ज्वरत्वरेति सूत्रेण उ ऊठितिप्र
श्लिष्य ह्रस्व एवोठ् विधीयत इति न दोष इति वाच्यम् अवतेः क्विपि जन ऊट्त्वत्र ... ख्यानापत्तेः नच दसेधत्यू
ट् स्थिते स्वत्र ह्रस्व एव क्रियत इति न दोष इति वाच्यम् मव्य धातोः क्विपि यत्वे ऊठि मोरित्यादौ ह्रस्वानापत्तेः नच
तत्रापि उ ऊठितिप्रश्लिष्य ह्रस्व एवोठ् विधीयत इति न दोष इति वाच्यम् आवयतेः क्विपि वार्णपरिभाषया सर्व
र्णदीर्घं बाधित्वा गुणवृद्ध्योः स्वाविति रूपापत्तेः इष्यते तु औरिति नचैवमपि ऊठ्ग्रहणं पुनरपि व्यर्थं संप्रसारणस्य
बहिरङ्गत्वे पि पूर्वरूपस्य बहिरङ्गत्वाभावादिति वाच्यम् हल इति ज्ञापकेन संप्रसारणस्थानिककार्ये संप्रसारण
तुल्यत्वातिदेशेन पूर्वरूपस्यापि बहिरंगत्वात् अंगांशे प्रत्ययस्योत्थिताकांक्षत्वादिति चिन्त्यमिदं
स्वस्वप्रकृत्यर्थान्यतरप्रत्यायकत्वरूपप्रत्ययत्वस्य नित्यसाकांक्षत्वाभावात् नित्यसाकांक्षत्वे वा देवदत्तस्य पुत्र इत्या
दौ आकांक्ष्यमाणदेवदत्तादेः पुत्रत्व इव प्रत्यये एव अंगान्वयस्यौचित्यात् अंगांशे प्रत्ययत्वस्योत्थिताकांक्षत्वे
तिलेखनस्यौचित्याच्च नच अंगत्वशरीरे पूर्वत्वस्य पतितत्वेन अंगत्वनित्यसाकांक्षमिति प्रत्ययांशे अंगत्वस्योत्थि

[illegible]

ताकांक्षतया तस्य तत्रान्वयस्यौचित्यादित्यर्थे ग्रंथतात्पर्यमिति न दोष इति वाच्यम् स्वाव्यवहितपूर्वत्व स्वनिष्ठ
विधेयतानिरूपितोद्देश्यताश्रयावयवकत्वोभयसंबंधेन प्रत्ययविशिष्टत्वरूपांगत्वस्य देवदत्तस्य पुत्र इत्यादौ विवा

कांक्षाशांसा नित्यसाकांक्षत्वाभावात् वस्तुतस्तु पुगन्तेति गुणविषये इकः सार्वधातुकार्धधातुकयोश्च मध्ये एकव
र्णव्यवधानसत्वेन नाजानंतर्यस्य प्राप्तिरेव नास्ति नाजानन्तर्य परिभाषायामेकवर्णव्यवधानसहने प्रमाणाभावा
-दिति दिक् अतएव निगाल्यत इति एतद्रूपसिद्ध्यर्थं तस्य दोष इत्याद्यारंभकवचनभाष्योक्तमसङ्गतं स्यादिति भावः
न च त्रिपाद्यामंतरङ्गपरिभाषाया अप्रवृत्तिस्वीकारे वृद्धिनिमित्ताप्रतिषेधो वक्तव्यः कार्तिः रमतो प्रतिषेधः नाम
तः तस्य दोषः संयोगादिलोपलत्वणत्वेषु च अन्यत्र निगाल्यते माषवपनी वणः प्रतिषेधो वक्तव्यः सुध्युपास्यः विसर्ज
नीयोऽनुत्तरपदे ना कुटः विसर्जनीयोऽनुत्तरपदे इत्यस्य अर्थवद्ग्रहणे इष्टस्य रेफस्य विसर्गो न भवति इत्यर्थः वैशिष्ट्यं च
स्वाव्यवहितपूर्वत्वस्वोत्तरप्रत्ययनिमित्तत्वाभ्यां एतदुभयसंबंधेन एवं च पंच वार्तिकानि कर्तव्यानि भवंति त्रिपाद्यां अ
प्रवृत्तौ न कर्तव्यानीति लाघवम् इति वाच्यम् ऋ धातोः क्ते तस्माद्धाचार इत्यत्र आर इत्यत्र वृद्धेर्बहिरङ्गत्वाभावेन
असिद्धत्वाभावात् ... स्याप्युपलक्षणत्वेन तस्मात्त्यजंतात् लङि आर्मसत् इत्यादावत्ववारणाय च अपि च
... प्राक्णोत् इत्यादौ यणादीनां बहिरङ्गत्वाभावेन कर्तव्यानीति कर्तव्यत्वाः तस्मा... ... क्वचित् ... त्रिपा
... त्रिपाद्यर्थं वार्तिकचतुष्टयस्यावश्यकत्वेन लाघवाभावात् न चैवमपि विसर्जनीयोऽनुत्तरपदे इति वा
र्तिकाकरणेन लाघवमितिवाच्यम् सर्वेषां रामाणां रात्रः प्राचां मते त्रिपाद्यां इत्यादौ सुध्युपास्य इत्यादौ सुद्ध्य

१ नुट्‌ अद्यो पानामसिद्धत्वेन मत्वा चनापत्तेः वस्तुतस्तु अंतवद्भावेन पंदातस्य रेफस्य न विसर्ग इति केचित्तन्न यद्वि
अस्माभिश्च विसर्जनीयोनुत्तरपद इत्यस्यैव सविशिष्ट रेफस्य रुनिमित्तको विसर्जनीयो न भवतीति अर्थः करणा
त इति उपाध्यायी त्यादौ न दोषः वैशिष्ट्यं च स्वाव्यवहितपूर्वोच्चस्थानिकत्व स्वनिमित्तकत्वोभय संबंधेन
अच्च निमित्तता तद्भावभाविता मात्रेण अत्र प्रथम संबंधोपादानेन दास्याः पुत्र इत्यादौ न दोषः अव्यवहितपूर्वे
त्युत्पाहोतुः पुत्र इत्यादौ न दोषः अच्पदोपादानेन शाङ्‌ र्ङिधी त्यादौ न दोषः द्वितीय संबंधोपादानेन धातः
पश्ये त्यादौ न दोषः स्वनिमित्तको विसर्गो न भवतीत्युक्त्याहोतुः पुत्र इत्यादौ सकार वैशिष्ट्येपि न दोष इति
दिक्‌ क्रियायाः साध्यत्वे नेति प्रथमतः साध्यत्वेन साध्यस्योपस्थितिः तदनंतरं साधनत्वेन सा
धनस्य तदनंतरं साध्य विशेषस्य तदनंतरं साधन विशेषस्य येन क्रमेणार्थोपस्थितिः तेनैव क्रमेणैव शब्द
प्रादुर्भाव इति प्रथमतः धातो अनन्तरं धातूत्तर प्रत्ययस्य तदनन्तरं उपसर्गस्य अनन्तरं कारकस्येति तेनैव क्रमे
ण तत्तत्संयुक्त कार्याणीति रवद्वा आ ऊढ इत्यत्र गुणः पूर्वं प्रवर्तते इत्यादौ गजेन्द्रं चरितार्थ संस्कारेत्यादौ
शब्द प्रादुर्भावात्प्रागेव सर्वेषामर्थानामुपस्थितत्वेन द्वित्वनिमित्तात्प्रागेव भूषणरूपार्थस्योपस्थितत्वेन
सुटोऽन्तरङ्गतरत्वम्‌ राद्धीत्यस्यानुकरण इति न च विशिष्टस्यानुकरणे विशिष्टे आङ्‌त्वाभावेन शङ्कैवासङ्ग
तेति वाच्यम्‌

एहीति विशकलितानुकरणे शङ्कायास्संकुलत्वात् पूर्वपक्षयुक्तिरिति वस्तुतस्तु परंतु पदस्य त्रिपाद्यामनारङ्गपरिभाषाया अप्रसा
दो भावेपि महाब्राह्मणः त्रयोविंशतिः अष्टाक[illegible]पालम् इत्यादौ आत्व त्र्यस्यादेशादेरसिद्धत्वेन सवर्णदीर्घाद्यप्रवृत्त्यापत्त्या परस्मैपदं
सर्वेषां पुत्रे इत्यादौ अलुको बहिरङ्गत्वेनासिद्धत्वात् स्मायाच प्रवृत्त्यापत्त्या आमीय बहिरङ्गस्यासिद्धत्वान्न भवतीति वक्तव्यत्वेनास्य
भाष्यस्यासिद्धान्तयुक्तित्वम् औभीयस्येति अस्य समानाश्रयस्येत्यत्रान्वयः बहिरङ्गस्येति अस्य नासिद्धत्वमित्यत्रान्वयः समा
नाश्रयस्येति असिद्धं बहिरङ्गमिति शास्त्रस्येत्यर्थः असासिद्धत्वादित्यत्रान्वयः अनेन आभीयशास्त्रयोः समानाश्रयत्वे[illegible]नारङ्ग
बहिरङ्गभाव एव नास्तीति व्याश्रयत्वे असिद्धवदत्रेत्यसिद्धत्वं न भवतीत्यर्थं गयोऽसङ्गत इत्यपास्तम् व्याश्रयत्वेपि अना–
रङ्गपरिभाषा अनारङ्गशास्त्रयोः समानाश्रयस्यैव तु भूशाश्यत्वादिति दिक् –

तुग्ग्रहणं ज्ञापकमिति न च ग्रामे च्छत्रमित्यादौ निसतुक्प्रवृत्त्यर्थं तुग्ग्रहणमावश्यकमिति वाच्यम् सेदुषः वेत्यधातोः क्विपि उत
इत्यादौ संप्रसारणाच्चेति पूर्वरूपस्यासिद्धत्वाभावाय पदान्तपदादिस्थानिक एव एकादेशो असिद्ध इति वक्तव्यत्वेन तुग्ग्रहणस्यैवै
यर्थ्यात् न चैवमपि [illegible]पि ग्रामेस्य इः ग्रामेः तस्य छत्रं ग्रामेच्छत्रमित्यादौ निसतुगर्थं तुग्ग्रहणमावश्यकमिति वाच्यम् नहि पदा
न्तादेङः परोऽस्तीति भाष्यप्रामाण्येन प्रक्रान्तसूत्रस्थज्ञापकपरभाष्यप्रामाण्येन च ईदृशानामनभिधानात् न चैवमपि
सापिते पितुग्ग्रहणं व्यर्थमनारङ्गानपि विधीन् बहिरङ्गोऽल्पपूर्वाधत इति परिभाषया पूर्वमेवल्पपुत्रकोः प्रवृत्तिरेवेति वाच्यम्
अनारङ्गनिमित्तविनाशकत्वपरं च तया प्राबल्यबोधनात् आतश्चनिरेस्मात दुरेत्यगतः इत्यादावनारङ्गत्वाद्धृपधगु
णः सिध्यति अन्यथा अनया परिभाषया णेरयादेशापत्तिश्च दिक्

अनावश्यकत्वबोधनादिति नवमहावैय्याकरण [illegible] ॥ [illegible] सिद्धत्वाभावाद्ययमावश्यकीति वाच्यम् आभी
बहिरङ्गस्यान्तरङ्गेनासिद्धत्वमिति पूर्वमुक्तत्वेनादोषात् नचैवम् [illegible] बहिरङ्गत्वेनासिद्धत्वाद्गुणो न स्यादिती
यमावश्यकीति वाच्यम् भविष्यति गम्यादय इति निर्देशेन धात्वविहितस्य [illegible] कार्यस्य [illegible] जातस्यासिद्धत्वं न भव

[illegible]

तीति कल्पनेनादोषात् अत एव यातिः भवेत् भविष्यती त्यादौ यस्लोपेडादिः सिध्यति अत्र धात्वविहितः प्रत्ययः प्रत्ययस्था
निकेनारोग्या [illegible] इति अस्नुद्दिसादौ च डः प्रत्ययस्थानिकत्वेन न दोषः नचैवमपि यः सः इत्यादौ सदादित्वस्य बहिरङ्ग
त्वेनासिद्धत्वादतो गुण इति पररूपं न स्यादितीयं परिभाषावश्यकीति वाच्यम् अस्तु इदं जगदम्बात्रेत्यादौ न जानन्तर्य
इति निषेधेन गुणह्रस्वयोरापत्या एतत्परिभाषाऽनित्यत्वस्यावश्यकत्वेनानुगमासम्भवादननुगतानां रङ्गपरिभाषाऽ
नित्यत्वेन सर्वेष्टसिद्धेरिति दिक् अनुवृत्तिसाहाय्यापि केति न चानुवृत्तिर्व्यर्था इति चेन्मास्तु इत्युक्तेरिति वाच्यम् अस्मा
देव भाष्यात् स्वरितत्वं भिन्नं भिन्नं तावत्पर्यन्तानुवृत्तिप्रयोजकं कल्प्यते तथा च प्रत्ययोत्तरपदयोश्चेत्येतत्सूत्रपर्यन्तानु
वृत्तिप्रयोजकस्वरितत्वकरणानुकूलपाणिनिव्यापार एवैयर्थ्येन परिभाषा ज्ञाप्यत इत्यदोषात् अत एवाङ्गस्याधिकारः प्रागभ्यासः
उत्तरपदाधिकारस्या [illegible] पादसमाप्तेरित्यादि सङ्गच्छते एकत्वार्थकाभ्यामिति एतेन अथ परिग्रहणं किमर्थं यत्रमा
नो तत्रैव स्यातां त्वयमानो युष्मयते रुप्रत्यये अस्मयते रुप्रत्यये इति भाष्यविरोधोन तत्र द्वित्वादिविशिष्टवाचकादेवे
भाष्ये णिच उक्तत्वात्

ત્રિચો વ્યનભિધાનમિતિ વસ્તુતસ્તુ અભાવેકવચને પ્રત્યયોત્તરપદયોશ્ચેત્યેકયોગ એવ કર્તવ્યઃ વિભક્તાવિતિ નાનુવર્ત
તે ત્વં ત્વદીયદ્ ત્વાદૌ પ્રત્યયપરત્વસ્ય સત્ત્વાદ્ ત્વદ્યુતદૃત્વાદૌ ઉત્તરપદપરત્વસ્ય સત્ત્વાચ્ચ તદ્રૂપસિદ્ધિઃ ઉત્તરપદ
તે ત્વં ત્વદીયદ્ ત્વાદૌ પ્રત્યયપરત્વસ્ય સત્ત્વાદ્ ત્વદ્યુતદૃત્વાદૌ ઉત્તરપદપરત્વસ્ય સત્ત્વાચ્ચ તદ્રૂપસિદ્ધિઃ ઉત્તરપદ
પદં ચ સમાસ ચરમાવયવે રૂઢમ્ ઇતિ યુષ્મત્પુત્ર ઇત્યાદૌ ત્રિપદે બહુવ્રીહૌ ન દોષઃ એવં સિદ્ધે પ્રત્યયોત્ત
રપદયોશ્ચેતિ યોગવિભાગાદ્ આપિ વિભક્તાવિતિ સંબધ્યતે ઇતિ કલ્પ્યતે તથાચ પ્રાતિપદિક પ્રકૃતિ
કત્વે આચાર ક્વિપિ ચ પ્રત્યયપરત્વ વિભક્તિપરત્વાભાવાદાદેશપ્રાપ્ત્યા અસાપકપરભાષ્ય
વિરોધાભાવેનાનભિધાને પ્રમાણાભાવઃ કસ્યનધાયસૂત્રભાષ્યપ્રામાણ્યેન ઇત્યનોઽસ્ય આચાર ક્વિપોઽ
નભિધાનમિત્યન્યદેતત્ આકડાદેશમેવાપિ ઇષ્યાદિતિ નચ યુષ્મક વ્રદ્ઇ ઇત્યત્ર વ ઓફલભેદઃ સિદ્ધાંતે યોષ્મા
કીણઃ આકડ્ પક્ષે યૌષ્માકીણ ઇતિ એવં યુવયોરયં યૌવાકીણ ઇતિ આકડ્ સિદ્ધાંતે યૌષ્માકીણ ઇતિ ચ
ફલભેદઃ નચ અનાદ્ગ્રાનપીતિ ન્યાયેન પૂર્વં યુષ્માદેશુ કઃ પૂર્વં યુવાદેશો ન ભવતીતિ નાયં ફલ ઇતિ વાચ્યમ્
એવં તર્હિ ચ કાયતેઃ તથાહિ અનાદ્ગ્રાનપીતિ પરિભાષા પ્રયોજ્યં યુષ્માકાદેશવિધાનમેવ વ્યર્થં તત્પ્રયો
જ્યશ્ચો ત્સર્ગસમાનદેશા ઇતિ ન્યાયઃ તત્પ્રયોજ્યં ચ મપર્યન્તા ... તત્પ્રયોજ્યાચાનાદ્ગ્રાનપીતિ
પરિભાષા તત્પ્રયોજ્યં ચ યુષ્માકાદેશવિધાનમેવ વ્યર્થમિતિ ... કર્જિવે પ્રિયે નિર્દિશ્યમાનત્વસ્યાનદ્ગ્ર

శ్రీగణేశాయనమః॥చూడామ శీకృతవిధుర్వలయీకలితవాసుకిః॥భర్గోంభవతుభ్వాప్యయ వీలాంతాండవపండితః॥

कारणाकज्विषये फलभेदाभावात् अकज्विशिष्टे निर्दिश्यमानत्वाभावेऽपि निर्दिश्यमानावयवसमुपलक्षणमिति
अनाप्यक इत्यादेर्नासङ्गतिः अत एव इम अइसेव वाक्ये किमः क इति करणादकच्सहितस्याकादेशासा
धनं ~~[struck out]~~ मनोरमोक्तं सङ्गच्छते अथवाऽमादक
इसेव ~~[struck out]~~ सिद्धेषु आकाद्यादेशविधानं ज्ञापकमिति अकज्विषये न फलभेदः घकालतनेषु

५ ति ज्ञापके नैतद्धितशास्त्रीयो देश्यतावच्छे ~~[struck out]~~ दकं यद्रूपं तद्रूपावच्छिन्नो देश्यताके कार्ये कर्तव्ये
तन्नाद्धितपरत्वसंभावनायां सुपामविद्यमानवत्त्वं कल्प्यत इति आकडू करत्येपि यौवाकीन इति रूपं न भव
तीति फलभेदस्याभावात् विनापि विरोधमिति चिन्त्यमिदम् विरोधे हि बलीयसा दुर्बलं बाध्यत इति न्यायेनावि
रोधाभावे बाधस्यैवानुपपत्तेः अन्यथा संज्ञयोरपि परस्परं बाध्यबाधकभावापत्तेः सत्यपि सम्भवे बाधनमिस
स्यकृते चारितार्थ्ये सत्यपीत्यर्थ इति तदुक्तार्थलाभाच्च तत्प्रौढ्येति वस्तुतस्तु कैयटग्रन्थे प्रकृते इत्थमाकारेण
न प्रौढिवादत्वम् प्रकृते सुबुकर वानारङ्गनिमित्तविनाशकत्वेन कैयटग्रन्थासङ्गसमावात् तदाशङ्कोति एतस्यो
- उत्तरं अन्तरङ्गनिमित्तविनाशकसुकर एव प्राबल्यं बोध्यत इति समाधानं वक्तुमुक्तमिति अथवा तदाशङ्कासमा
धानं वक्तुमुक्तमिति काकुः अत्र हेतुः अनया परिभाषया अन्तरङ्गनिमित्तविनाशकसुकर एव प्राबल्यं बोध्यत इति
अत एवातिमव कान्इसाद्यावकच् सिध्यति समासस्यान्तरङ्गविनाशकत्वेपि सुकोन्तरङ्गविनाशकत्वाभावात् अत्रान्तरङ्ग

प.
४५

निमित्तक विनाशकत्वं कस्य ग्राह्यत्वं बोध्यं तदुक्तं [illegible] ... [illegible] ... कृतप्रत्ययादिति तुक्
गुणनिमित्तविनाशकत्वाभावेन नारकृत्वात्तुणे संयोगपूर्वकत्वे [illegible] ... नित्यमित्याद्युदा
तस्य कीनश्च निमित्तविनाशकत्वस्य तुल्यभावेन अनारकृतत्वात् [illegible] ... तयोः पश्चात्समासस्वरे णा
नोदात्तत्वं सेत्स्यतीति दिक्। केचित्तु अनारकृतान्विधीनित्यपरिकृतः पाठः अतएव स्यमोर्नपुंसकाल्लोपः इति सूत्रे सदादिभ्यश्चे
ति वार्तिकं संगच्छते अन्यथा तत्कुलमित्यादौ अनेन न्यायेन सदाचत्वात्प्रागेव लुकि तदसङ्गतिः स्पष्टैव अतएव त्वं कुलमवतादित्यादि
सिध्यति अन्यथा अनेन न्यायेन अमूतावकं प्रागेव लुकि तदसिद्धिः स्पष्टैवेत्याहुः परे तु अनारकृतानपीत्यपि [illegible] पाठः

विनाशक

[illegible] निमित्तं तुक्त्वात्तस्य चानया प्राबल्यं बोध्यते अतएव अतिशयेन ब्राह्मणः ब्राह्मिष्ठा मध्यत इत्यादि सिध्यति अन्यथा ब्रह्मन्
जस् इष्ठन् इत्यस्यां दशायां तुकं बाधित्वा परत्वात् टिलोपे तस्याभीयत्वेनासिद्धत्वात्पुनः टिलोपाप्राप्त्या तदसिद्धिः
स्पष्टैव एवं मध्यत स्त् इत्यस्यां दशायां तुकं बाधि[illegible] ... [illegible] इत्यादिलोपे प्रत्ययलक्षणेनालसंत
स्येति दीर्घे तदसङ्गतिः स्पष्टैव त्यदादिभ्यश्चे ... तिवार्तिक विरोधश्च उपसंजनिष्यमाणन्याये
न पूर्वं तु कोऽपि प्राप्त्या तदर्थं वार्तिकस्यावश्यकत्वात् अतिकं पुंवद्रसमद्रो [illegible] सत्त्वासकुलमित्यादौ न
दोषः तुल्यो रातिविषयसप्तम्याश्रयणेन सेत्स्यता [illegible] तौ भवतादित्या [illegible] दौ न
दोष इति प्राहुः

तस्य बाष्प्र[illegible]थमा ... मान्यप्रामाण्येन अनभिधानात् सम्भावनाया इति अंतरंग ... भावन योग्य बहिरंगशास्त्रप्रवृत्ति
सम्भावनाप्रयोज्यानारङ्गनिमित्तविनाशसम्भावनाया इत्यर्थः [illegible] परिभाषाप्रवृत्तिस्वीकारादिति इयाय इये ई षतुः ईयतुरित्यादौ स-
वर्त्रैव [illegible] सूत्रं सार्थकं [illegible] यदा देशेन सर्वत्रैव सवर्णदीर्घनिमित्तविनाशसम्भावनायाः सत्वादिति वाच्यम् यत्र
बहिरङ्गशास्त्रप्रवृत्तिप्रयोज्य [illegible] अन्तरङ्गनिमित्तविनाशं न तु अन्तरङ्गशास्त्रप्रवृत्तिप्रयोज्यो बहिरङ्गनिमित्तविनाशस्तत्रैवास्या
[illegible] परिभाषाप्रवृत्तिरिति स्वीकारेणादोषात् ई षतुः ईयतुरित्यादौ सवर्णदीर्घेणापि इयङ्निमित्तविनाशसम्भावना इयङापि सवर्णदीर्घनि-
-मित्तविनाशसम्भावनापि इति नैतत्परिभाषाप्रवेशः शङ्कास्य इयाये [illegible] यादौ तु सवर्णदीर्घप्रवृत्तेरुत्तरमपि अन्योन्यतीतस्य
-प्राप्त्या यद्वौ च सवर्णदीर्घप्राप्त्या चाकृतेति परिभाषाप्रवृत्तिस्पष्टैव इयेषे [illegible] तिसंपातायातम् औचित्यात्तेति वस्तुतस्तु अपवाद
[illegible] प्रयुक्तबाधस्य नैयायिकत्वेन ज्ञापकपरभाष्यं प्रौढ्येति द्रष्टव्यम् अत्र च ज्ञापकं हरतेरनुपने वृद्धि इति सूत्रम् अन्यथा कर्मण्यपि इयनेनैव [illegible] सि-
द्धे तद्वैयर्थ्यं स्पष्टमेव न च अभ्यनात्वप्रयुक्तङीबभावाय तत्सूत्रं सार्थकमिति वाच्यम् एवं तर्हि पुरोगतोऽग्रेषु सर्तेरिति ट विधायकस्य ज्ञा-
पकत्वसम्भवात् अन्यथा पुरस्सर इत्यादावनारङ्गत्वात् अणि टा [illegible] ङ्णोर्न विशेष इति दिक् समानकार्यत्वं चेति समानकार्यत्वं च वार्णशास्त्रीयस्था-
नितावच्छेदकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकस्थानि [illegible] तीकत्वम् वार्णशास्त्रीयस्थानितावच्छेदक
पर्याप्त्यनुयोगितावच्छेदको यो धर्मः स एव आङ्गशास्त्रीयस्थानितापर्याप्त्यनुयोगितावच्छेदको अपेक्षित इति निष्कर्षः यथा इयायेत्यादौ
वार्णशास्त्रमकः सवर्ण इति तच्छास्त्रीयस्थानितावच्छेदकं पूर्वत्वपरत्वं च तत्र परत्वस्य पर्याप्त्यनुयोगितावच्छेदकं आरेकारवृत्तितद्व्याप्तिकत्वम्
तदेवाङ्गशास्त्रान्योन्यतीति शास्त्रीयस्थानितापर्याप्त्यनुयोगितावच्छेदकमिति लक्षणसमन्वयः अत एव च च्छ्रा विद्यादावनारङ्ग-
त्वात् किं अजन्तत्वाभावाद्धु [illegible] स्यादित्याशङ्क्य वैयधिकरण्यान्वयेन समाधानपरं भाष्यं सङ्गच्छते अन्यथाऽङ्गत्वान्तुकः पू-
र्वमेव कृते तदसङ्गतिस्पष्टैव निरूढानुगमे तु तुक आगमत्वेन वार्णशास्त्रीयस्थानितेत्वनाश्रितेति दोषः अत एव युव्वतीत्यादौ गुणोन
अत एव गातेगान इत्यादौ आनेमुगिति मुक् न तत्र हि गा आ आन इ गा अ आते इति स्थिते आङ्गशास्त्रीयस्थानितापर्याप्त्यनुयोगितावच्-
-छेदकं आनसंबंधि आकारवृत्ति तद्व्याप्तिकत्वम् वार्णशास्त्रीयस्थानितावच्छेदकपर्याप्त्यनुयोगितावच्छेदकं च गा आ इत्याकारादिवृत्तित

न्यायेन यणं बाधित्वा आर्तिपिपर्त्योरित्तीत्वे पुनर्यणोऽप्राप्त्या यणोऽपि न सकललक्ष्यप्राप्तत्वम् न च अभ्यासविकारेषु बाधास्य पूर्वं प्रवृत्तस्य उरदत्त्व
लेपश्चादित्वे यणस्सकललक्ष्यप्राप्तत्वमस्त्वेवेति वाच्यम् चक्रीयापत्तेः तथाहि ऋऋति इत्यस्यां दशायां यणसवर्णदीर्घे [illegible] नांप्रा
प्तोयणं बाधित्वा ऽपवादत्वात् सवर्णदीर्घः प्राप्तः तं बाधित्वा प्रतिपदविधित्वादित्वं प्राप्तं तद्बाधित्वा अभ्यासविकारेषु बाधस्य पूर्वं प्रवृत्त्या
अत्वं प्राप्तं अभ्याससंज्ञाप्रयोजकीभूतप्रत्ययनिमित्तकत्वेन बहिरङ्गं तद्बाधित्वा अंतरंगत्वात् यणप्राप्ताविति वाच्यम् ऋ ऋति
इत्यस्यामेव दशायां गुणस्य प्राप्तत्वेन [illegible] वितिद्वित्वात् प्रागेव गुणे [illegible] द्वित्वे हलादिः शेषे च अ अर्ति इति दशायामित्वे यणाप्राप्त्या इयङ्
विषये यणः सकललक्ष्यप्राप्तस्यानिराबाधत्वात् अर्तेरिवर्णस्योति न च उरिति स्थाने [illegible] ऋकारस्थानिकोय इकारस्तस्योङे से
- र्थे नैव सामंजस्ये साहचर्याश्रयणवैयधिकरण्यान्वयादिकमयुक्तमिति वाच्यम् आर्य इत्यस्यासिद्ध्यापत्तेः ऋ धातोर्यङ्लुकि द्वित्वे अभ्या
- सेरिकि इयङि [illegible] गुणे हलङ्यादिलोपे च रूपं अंत्यरिकसंबंधीकारस्य ऋकारस्थानिकत्वाभावात् दसिद्धिं स्पष्टैव एतेन भ्रमा
मियङ् अर्तिपिपर्त्योश्चेत्यनेनैव इयतीत्यादिलक्ष्यासिद्धौ उरितिन्यासो [illegible] व्यर्थः इत्यपास्तम् तत्र श्चाविमनुवृत्त्या आर्य इति लक्ष्या
सिद्धिरूपदोषस्य दुरुद्धरत्वात् अनभिधानादिति चिन्त्यमिदम् प्रत्ययांतत्वेन आमएव प्रवृत्त्या इयद्विषयत्वस्य दुरुपपादत्वात् न च इयेथ
मनउवोनीयिषति मनइयेनीयिषति एधिइयेधिरूपयिषति देवइयच्छकीयिषति इत्यादौ सूत्रं चरितार्थम् तथाहि इयेथे त्यादौ द्वित्वं
चेनेन्नीतिनिषेधाज्जादध्या गुणे द्वित्वे ह्रस्वे [illegible] इयङ् प्राप्तिरर्थस्य स्पष्टमेव एवं मनःशब्देन [illegible] ओनशब्देन समासे तस्मात्क्यचि सनि
यथेष्टनामधातुत्वे इति एन ओन इत्यनयोर्द्वित्वे ह्रस्वे इयङ् प्राप्तिस्पष्टैव एधि इत्यस्य द्वित्वे स्थानिवद्भावेन तिङ्न्तत्वाद्रूपपि तस्मात्क्यचि सनि [illegible]
अजादेस्याचेतरस्येति द्वितीये धिइत्यस्य द्वित्वे ह्रस्वे इयङ् प्राप्तिस्पष्टैव एवं देवशब्देन [illegible] मासे [illegible] कअस्त्वित्याचेतस्मात्क्यचि सनि
- द्वित्वे उरदत्वे सन्यतः इत्वे नइत्वे न [illegible] स्पष्टमेवेति वाच्यम् निरर्थकस्येषु अनारकत्वात्स्य [illegible] र्थस्य स्पष्टत्वात् देवइयच्छकीयिषती

५
०४५

[illegible]

[illegible]

चूर्ण अच्पदवाच्यः इतिशक्तिज्ञानस्य अन्यथासिद्धत्वेन शाब्दबोधाजनकत्वाद चूत्वे शाब्दबोधजनकशक्तिज्ञानीयविशेष्यतावच्छेदकत्वाभावात् शक्यार्थबोधमन्तरा लक्ष्यार्थबोधासंभवेन अतो मिसरोग्सि इत्यादौ ह्रस्वाकारो अत् पदवाच्य इति शक्तिज्ञानस्य शाब्दबोधजनकत्वेन अत्वे स्वविषयकशाब्दबोधजनकशक्तिज्ञानीयविशेष्यतावच्छेदकत्वम् अस्त्येवेति न दोष इति दिक्।

